यथानाभावंगुष्ठयुतामध्यमतयाशिवे लिंगेपीत्यर्थः ३७ तापवेति जान्वोस्तापवं अंगुष्ठरहिताः सर्वास्तपएवविहिता इत्यर्थः २२

22

पदद्वये सांगुष्ठाः सर्वांगुलयो विहिता इत्यर्थः स्थानवर्णयोरित्यादि हृष्टादिन्यासे स्थानार्णयोरेव विति
मयो भवति तथा हि स्रष्टौ मूर्द्धा मणौ स्थितौ हृदये गौ सं...तौ पादद्वयोः गौ अंगुलौ त्वनन्तरत्याहृतोऽक्ष
भी निरष्टौ स्थितौ सहनौ च यत्र स्थाने याङ्गुलिर्विहिता इत्यर्थ पदद्वये सानुषे वांगुल्या तत्र स्थाने न्या
सः कार्य इत्यर्थः ३८ अथ भूतिपंजरन्यासमाह वक्ष्ये परं न्यासवरं भूत्यभिधं भूतिकरं मंत्रवर्णाहुति
मयं गुप्तमं मंत्रिवरैः ३९ अपरं भूत्यभिधं भूतिनामकं न्यासवरं पामि कीदृशं भूतिकरं ऐश्वर्यकरं
तथा मंत्रदशाहुतिमयं मंत्रदशाहुतिघटितं तथा मंत्रिवरैर्गुप्ततमं ३९ भूतिन्यासस्य स्थानान्या
हृद्वा आधारध्वजनाभिहृत्कलमकांसेषु हृदये कंधरानाभ्योः कुक्षिपृष्ठोरुजानुगले पार्श्वापरश्रो
णिषु कांसादिक्षितिनः कपोलकरपत्संधग्रशाखासकेनन्याव्यादि दिशाम्बमूर्ध्नि सकले दोःसाश्व
सक्तोस्तथा ४० पिंडोद्भास्वकंठावधेतलेदकंदभुजानुश्रयपार्श्विक्कुमर्माणास्मन्नूच्छातन्त्यसेत्कुहात्रांगु
त्तवदोजपार्श्वस्फिगुरुस्थलीजानुजंघांघ्रिपु हृत् ४१ आधारो हृवर्णस्याधो मूलाधारस्थाने ध्वजोलिंगं
नाभिः प्रसिद्धा हृत् हृदयं गलः स्पष्टं अंसद्वयं कुरुद्वयवपत्तेश्च दमास्तत्प्रथमाश्चाहुति कंधराचाटा कंधरा
कंठ इत्यन्ये नाभिः कुक्षिः हृत् स्तनद्वयं पार्श्वद्वयं अपरः पृष्ठदेशः श्रोणिः कटीश्च परः श्रोणिपः पर

क्र॰ म॰
दी॰
२३

23

भागः श्रोणीर्जघनप्रदेशः इत्येके पञ्चदशस्तद्द्वितीयाश्रावृत्तिः कंशिरः आस्यमखं अक्षिनेत्रद्वयं श्रुतिः
श्रवणद्वयं मेऽनि नासिकाद्वयं कपोलद्वयं पञ्चदशस्तत्तृतीयाश्रावृत्तिः करयोः संध्यग्रशाखास्वसंधि
शुक्लकपक्षे परमणिवंधीपुलिमूलेषु अंगुल्यग्रेषु तथापि चांगुलीषु पञ्चदशस्तद्दक्षिणकरे चतुर्थ्याश्रा
वृत्तिः एवं वामकरे पंचमाश्रावृत्तिः एवं स्फिक्जानुजंघांगुल्यंगुलिमूलेषु पत्तिषु अंगुल्यग्रेषु तथा
पि चांगुलीषु पञ्चदशस्तद्दक्षिणपादे षष्ठ्यावृत्तिः एवं वामपादे सप्तमावृत्तिः अतएव हस्तपादयोर्न्या
सवत्तष्टयमिति त्रिपावितः केन त्वमादीति केपस्तकमध्योतस्पृगस्तकस्पृष्टवीदिचतुर्दिक्षु सक
लेऽस्मिन्नमसमस्तके मध्ये दक्षिणे नादो सेव्यत्र वाद्यहृदये व्यापकतया तथा सर्वेभ्यः हृत्कमलस्याधिष्ठाता
यो मध्यप्रदेशयोः पञ्चदशस्तदष्टमावृत्तिः शिरोत्यासेति शिरोमस्तकांत्यक्षिनेत्रद्वयं आस्यमुखोक
ठरव्योगलः हत्कद्वयोर्हृदमदरं कंदो मूलाधारः स्वाधिष्ठानं कंदहत्यपरे अप्पुलिंग जान्विति जानु
द्वयं प्रपदिति पाद‌द्वयं पञ्चदशस्तन्नवमावृत्तिः श्रोत्रगंडेति श्रोत्रद्वयं गंडद्वयं अंसद्वयं स्तनद्व
यं पार्श्वद्वयं स्फिक्जघनद्वयं अरुस्थलीत्रद्वयं जानुद्वयं जंघाद्वयं अंघ्रिद्वयं एतेषुदशस्तद्दे
शदशमावृत्तिः इत्थमनेन प्रकारेण मन्त्रज्ञानमेतत्संबंधान्न्यसेदित्यर्थः ॐ नमः आधारेपीनमः २३

लिंगेइत्यादिःप्रयोगःकार्यः ४१ एतन्न्यासस्यफलमाह इतिकथितंविभूतिपंजरंसकलस्वार्थध
र्ममाह्लादं नरतरुणीमनोनुरंजनं हरिचरणाब्जभक्तिवर्द्धनं ४२ इत्यनेनप्रकारेणविभूतिपंजरंकथि
तंकीदृशं सकलानांपुरुषार्थचतुष्टयदानेनपुरुषनारीचित्ताह्लादकं हरीति हरिचरणाब्जयोर्भ
क्तिवर्द्धनं ४२ अथमूर्त्तिपंजरन्यासमाह स्फूर्त्तयेप्यास्यमंत्रस्यकीर्त्यतेमूर्त्तिपंजरं आर्त्तिग्रहविषा
रिघ्नंकीर्त्तिश्रीकांतिपुष्टिदं ४३ अथास्यमंत्रस्यस्फूर्त्तयेउद्दीपनायमूर्त्तिपंजरंकीर्त्यतेकीदृशं आ
र्त्तिः पीडा ग्रहः सूर्यादिजनितमशुभं विषंस्थावरजंगमं अरिः एतान्हंतीतिआर्त्तिग्रहवि
नाशनंकीर्त्तिःप्रथा श्रीःसंपत्तिःकांतिः सौंदर्यंपुष्टिर्बलंतन्ददं ४३ अथन्यासमनुदर्शति केशवादि
युगपक्षमूर्त्तिभिर्धान्तपूर्वमिहिरान्नमोंतिकान् द्वादशाक्षरभवाक्षरैःसह क्लीववर्णरहितैःक्र
मान्न्यसेत् ४४ केशवादीनांयुगपक्षमूर्त्तिभिर्द्वादशमूर्त्तिभिः सहधान्तपूर्वमिहिरान् द्वादशादि
त्यान्क्रमेणन्यसेत् कीदृशान्आदित्यान् नमोंतिकान्नमः पदांतान्पुनः कैः सहद्वादशाक्षर
भवाक्षरैः वक्ष्यमाणद्वादशाक्षरस्थैर्द्वादशाक्षरैः सहेत्यर्थः तथाक्लीववर्णरहितैः ऋॠऌॡएत
च्चतुष्टयरहितैः स्वैरकारादिभिर्द्वादशभिः सह अत्रायंक्रमः आदौस्वरस्वदन्तद्वादशाक्षरपंच

क्र·म
दी·
२४

24

रेतनः केशवादिमूर्त्तिः ततश्चादित्यः ततो नमः पदं प्रयोगस्तु ओं श्रों केशवधातृभ्यां नमः इत्यादिः अन्ये तु ओं
श्रीं केशवाय धात्रे नमः इत्यादिप्रयोग इत्याहुः ४४ न्यासस्थानान्याह भालोदरहृद्गलकूबरके वामेतर
पार्श्वभुजांसगले वामत्रयपृष्ठककुत्सु तथा मूर्द्धन्यथ षड्युगवर्णमतः ४५ भाले ललाटे उदरे हृदये गल
कूबरके कंठे वामेतरपार्श्वे दक्षिणपार्श्वे दक्षिणभुजमूले दक्षिणगले वामत्रयेति वामपार्श्वे वामहस्तमू
ले वामगले वा पृष्ठे ककुदि पादद्वये एवं द्वादशस्थानेषु न्यास उक्तः मस्तकेपि द्वादशाक्षरं न्यसेदित्याह मूर्द्ध
नीति अथानंतरं तथा तेन प्रकारेण मूर्द्धनि षड्युगमेतं द्वादशाक्षरं न्यसेदित्यर्थः आवृत्तिपाठेप्ययमेवा
र्थः ४५ मस्तके सममनून्यासस्य प्रयोजनमाह चैतन्यात्मतवपुरर्ककोटितेजा मूर्द्धस्थो वपुरखिलं स वासु
देवः ऊर्ध्वस्थविमलपाथसीव सिक्तं व्याप्नोति प्रकटितमंत्रवर्णकीर्णं ४६ स प्रसिद्धो वासुदेवः मूर्द्ध
स्थः सन्नखिलं शरीरं व्याप्नोति स्वतेजसेति शेषः कीदृशो वासुदेवः चैतन्यमेवात्मतत्तदेव वपुर्यस्य
तथार्ककोटिरिव तेजो यस्य सः कीदृशं वपुः प्रकटिताः मंत्रवर्णाः द्वादशाक्षरमंत्रवर्णास्तैः की
र्णं व्याप्तं किमिव पयो व्याप्नोति ऊर्ध्वविमलपाथसे जले सिक्तं निक्षिप्तं कुम्भस्थदुग्धमिव ४६ विसर्प २४
जरस्य एवं कृत्यं दर्शयति प्रणीत्यादिनेत्येके तन्न मूर्द्धन्यकैः कृत्वेत्यादिनैव शारदोक्तत्वात् वस्तुत

ऽङ्घादीरन्यासज्ञानस्योपसंहरणमिति सृष्टिस्थितीदशपंचांगयुग्मं मन्त्रादित्रितयं कामहस्तं विन्यस्य
न्तश्रयायित्वा वमुंझाभूयोदिग्धादशाकं वंधनीयं ५७ सृष्टिस्थितीपुनः स्वदेहे विन्यस्य न्यादशपंचांगयुग्म
दशांगं पंचांगं च विन्यस्य मन्त्रादित्रितयं ऋषिछंदोदैवतत्रयं कामस्य हस्तशिरोमुखहृदयेषु विन्यस्य चि
न्त्यर्थः अनेन सृष्टिस्थिती पुनः कारयोर्विन्यस्येत्याकृत्स्नत्रविधिः समीरिता करस्थनेन करन्यासज्ञात
स्योपसंहृतचेतापकृतचाग मंद्रावत्समाणग्रथयिचावधावत्समाणेनास्त्रमंत्रेण मूपः पुनरपिदि
शीदशाकं वंधनीयमित्यर्थः ५७ अथ द्वादशान्तरमुद्धरति नादंतादेविश्वमूर्त्तिश्चशार्ङ्गी मांसान्तेनेवाय
मध्येस्थदेवा षट्‌हंद्वार्णोमंत्रवर्यः सउक्तः साक्षाद्द्वारं भुक्तिमुक्त्योः स्वरागम्या ५८ नादं प्रणवः हार्दं नमः विश्व
मूर्त्तिर्भकारः शार्ङ्गीणकारः मांसान्तस्य वकारस्यान्ते वसानेतेकारः वायमध्ये वाकारयकारयोर्मध्ये म
देवेत्यन्तरत्रैयं सुप्रसिद्धः षट्‌हं द्वार्णः द्वादशान्तरो मंत्रवर्यः उक्तः कीदृशः भुक्तिमुक्त्योः साक्षादद्वा
वधानेन स्वरागम्यद्वारं स्वरागमोपायमित्यर्थः ५८ द्वादशादित्यान्नाह धात्रर्यमभित्राख्यौ वरुणोंशुभ
गविवस्वदिंद्रयुताः पूषाख्यपर्जन्यौ च त्वष्टाविस्वश्च भानवः प्रोक्तः पतेद्वादशभानवः प्रोक्ताः एतेन
केषांता अर्थमामित्रः वरुणः अंशः भगः विवस्वान् इंद्रः पूषा पर्जन्यः त्वष्टा विष्णुः इति अथाष्टाद

क्र· म·
दी·
२५

25

पात्तरमेवन्यासमाह अथतत्पुगरंधाणिस्याहेमनोनौमनंतुवे स्वपत्तकरद्वंद्वेयेवांगमेगुलिपंचके ५१

अथानेनैरंतपुतः पुगरंधाणिस्यरंधाणान वानोपुगे अर्णाः अत्तराणिपकृतत्याक्षादशात्तरस्यमंत्रस्याहस्ता

तेतुवे राजदंतादिवाइंपुशाद्गस्यपरनिपातः करद्वंद्वेऽङ्गुलिपंचकेपंचांगंपूर्वोक्तमंत्राक्षरैः रचयेतन्यस

त नत्तमूर्द्धव्यापकव्यापित्रिधाः प्रणवं सकृत् मनजालिपयोन्यस्याभ्यः पदानि च सादरं ५ अथानंतरं त

तुअनंततोमनुमेत्रैत्रिशालिवारंव्यापकव्यापकतयाविन्यस्यतथासकृदेकवारंप्रणवंविन्यस्यअनंतरंमंत

लिपयः मंत्रवर्णाः न्यस्याः अथोनंतरंसादरंयुथासात्तथापदानिन्यस्यानीत्यर्थः ५ मंत्राक्षरन्यासस्थानमा

ह कचक्षविललाटभ्रूयुग्मांतरश्रवणाक्षियोयुगलवदनग्रीवाहृन्नाभिकयुग्मवंशाभूषन्यसेत्तन्मितधी

मानंत्रयोरत्नगाशिशिरसिश्रुवेनयनसवलहस्ताग्रिबपेत्पदपंचके ५१ कवानांकेशान्तानवविशि

रसि ललाटे भ्रूयुग्मांतरे भ्रूमध्ये श्रवणाक्षिनोयुगलेति श्रोत्रद्वये अक्षि

द्वये नासिकाद्वये वदने ग्रीवायां हृदये नाभौ । कयुग्मयेकटी ॥

द्वये पृष्ठद्वये मन्त्रां न्यसेत् ॥ अंशौ रेकजाचारैकेव तिबोध्ये ॥

ला ॥ ~ ॥ ॥ ~ ॥ ~ ॥ ~ ॥ ॥ ~ ॥ २५

तिबोध्यं शिरसि ध्रुवं प्रणवं न्यसेत् पदपंचकन्यासस्य स्थानान्याह नयनेत्यादि नयनद्वयं मुखं हृत्
गुह्ये अंघ्रिद्वये एतेषु मंत्रस्य पदपंचकेन न्यसेत् ५१ पंचांगानि न्यसेज्जूंयोमन्यादीन् न्यस्त्वैवं तत्स्वरूपं ध्या-
णो ध्येयो वक्ष्यमाणा वध्यामुद्रोपचाराः स्युः ५२ भूयः पुनरपि पंचांगानि शरीरे न्यसेत् अन्यस्मैवं केशवादिन्यास
मातृकादिवर्णादशार्णो नवतत्त्वे अत्र दशतत्त्वादिन्यासेषु मतं च द्विरावृत्तिर्विशेष इति लघुदीपिकाकारः अथा
नंतरं मंत्रोद्देशात्तराष्टादशाक्षरयोर्विधानं व्यतीयायाः सुल्ला मुद्रा वक्ष्ये ५३ हृदयादिगन्यासे मुद्राः प्र
दर्शयति द्वाभ्यां अंगुष्ठाग्रं हृज्जवोर्हस्तयोरपि भवेन्मुद्रा हृदये शीर्षके च अथोंगुष्ठावरमुष्टिः शिखा
याः करद्वंद्वांगुलयो वर्मणि स्युः ५४ नाराचमुष्टिरुन्नतबाहुयुग्मकांगुष्ठतर्जनीभ्यां ध्वनिस्त्व दिग्बंधविधा-
नं कथितास्त्रमुद्रा यन्त्राहिणी तर्जनी मध्यमे च ५५ अंगुष्ठाग्रं अंगुष्ठरहिताः हृज्जवः पद्मकाः हस्तयो
र्वाः हस्तांगुलयः हृदये मुद्रा भवेत् शीर्षके च शिरस्यपि एषैव मुद्रा भवेदित्यर्थः अथोंगुष्ठास्य मुष्टिः शि
खायां स्वयेनांगुलयो यां मुद्रा भवेत् करद्वंद्वांगुलयः सर्वा अपि हृज्जवः वर्मणि कवचे मुद्राः स्यु
वाच्या भवेयुरित्यर्थः ५६ नाराचेति ध्वनिः प्राहुः अस्त्रमुद्रा कथिता पद्मयः कीदृशो ध्वनिः नाराच
वन्मुष्टावत्सहोन्नतौ यो बाहू तयोर्युग्मकं द्वयं तस्यांगुष्ठतर्जनीभ्यामभिहताभ्यामुदितः पुनः

क्र॰ म॰
दी॰
२९

कीदृशाः विश्वक्चतुर्दिक्षु विषक्ताः विस्तीर्णाः यत्र मंत्रे प्रदिष्टानि तेषांगमस्ति तत्र मंत्रे तर्जनीमध्यमे मि
लिते मुद्रा ज्ञेया ५४ अथ वेणुमुद्रामाह ओष्ठे वामकरांगुष्ठो लग्नस्तस्य कनिष्ठिका दक्षिणांगुष्ठसंसक्तात
हालिष्ठा प्रसारिता ५५ तर्जनीमध्यमानामाः किंचित्संकुच्य चालिता नन् वेणुमुद्रेह कथिता सर्वप्रेयसी
हरेः ५६ वामकरांगुष्ठः ओष्ठे लग्नः कार्यः तस्य वामहस्तस्य कनिष्ठिका दक्षिणांगुष्ठे संसक्ता कार्या तत्कनि
ष्ठा दक्षिणहस्तकनिष्ठिका प्रसारिता वक्रा दीला कार्या उभयहस्ततर्जनीमध्यमानामिकाः किंचिद्
त्वं चालिता चालनीया ईदृश इह प्रोक्ता वेणुमुद्रा कथिता तयापास्त नरांगुष्ठा । हरेः प्रेयसी वल्लभा ५८
लोकेतेत्र प्रसिद्धत्वात् मालाश्रीवत्सकौस्तुभाः तत्वं तेषु तन्मुद्राणां मुद्रा बिल्वफलाकृतिः ५७ मालाश्रीव
त्सकौस्तुभमुद्राः अत्र प्रथमया नेयात् तेषां तत्र प्रसिद्धत्वात् तत्र गले वनमालाभिनयनं वनमालाः
उक्तानि तत्र वामकरतर्जनीकनिष्ठोपरि अधोमुख दक्षिणकरकनिष्ठतर्जनिके संयोज्य वामांगुष्ठो
परि दक्षिणकरस्य ओं नामिकामध्यमांगुलिद्वयं कृत्वा दक्षिणहस्तांगुष्ठो वा वामकरमध्यमाना
मिके कुर्यादेषा श्रीवत्समुद्रा वामकनिष्ठया दक्षिणकनिष्ठां निपीड्य वामानामिकया दक्षिणतर्ज
नीं च निपीड्य शिष्टवामांगुलित्रयस्य परिकृत्वा वामतर्जनीसहित दक्षिणहस्तांगुलित्रयमध्ये मेक २९

26

त्रयोजयेदेषाकोस्त्रभमुद्रा विल्वमुद्रामाह उच्यतइति अथुः तमुद्राणांमध्येभद्राश्रेष्ठा विल्वफलाकृ
तिर्यामुद्रासाउच्यते ५७ अंगुष्ठवाममध्येउन्नतरमितरांगुष्ठके नाधवधातस्याग्रपीडयित्वांगुलिभिराप
वनायामहस्तांगुलीभिः बध्वागाढं हृदिस्थापयन्तविमलधीर्ध्वाहरन्मारवीजंविल्वाख्यामुद्रिकेषास्तु
दामिहकथितागोपनीयाविधिज्ञैः ५८ वामेअंगुष्ठंउर्ध्वंउन्नतरंदंउत्कारम्हर्डंकुर्यात् अथानंतरंइतरां
गुष्ठकेनदक्षिणहस्तांगुष्ठेनवध्यातस्पष्टेदक्षिणहस्तांगुष्ठंतिर्यक्अग्रेत्यर्थः तस्याग्रंदक्षिण
करांगुष्ठस्याग्रेअंगुलीभिर्दक्षिणकरांगुलीभिः पीडयित्वाअवनानाअपिदक्षिणकरांगुलयोपिवामह
स्तांगुलीभिर्गाढंयथास्यात्तथाबध्वाविमलाधीभिर्दक्षिणकरांगुलीभिः पीडयित्वाअवनानाअपिद
क्षिणकरांगुलयोपिवामहस्तांगुलीभिर्गाढंयथास्यात्तथाहृद्यास्थापिता किंभूताविधिज्ञैः अ
काशैर्गोपनीया ५८ एतस्याः फलमाह मनोवाणीदेहैर्यदिहवदिवारात्रिविहितंममत्यामत्यावा
नदविलमसोज्झकृतवयं इमांमुद्रांज्ञात्वानोतपयाति नरस्तेषुरगणानमेत्यस्याचीनाभवतिसत
तसर्वजनता ५८ अमोनरइमांमुद्रांज्ञानन्तनन् अविलंडुस्त्रनवयंकपयातिहरीकरोती यत्
मनोवाणीदेहैः अमत्यामत्यावादिवारात्रिविहितंदिवारात्रौवकृतंयदिहवक्षणावापिविहितमिति

क्र॰ म॰ दी॰ क्वचित्पाठस्तदा हृज्जन्मानिजस्मोनेरेवविहितमित्यर्थः तथा स्वरगणाश्रुपितेनमीति तथा स्वसमुद्राकर्णैः स
वेजननासनतेश्रधीनाभवति ५४ अथास्त्रमंत्रं कथयति प्रणवहृदोरवस्यने सचतुर्थ्यस्वदर्शनेन तथास्त्र
पदंच उल्काफडंतपमनाफलयेत्मनुनास्त्रमनुद्यादशाहरितः ५५ प्रणवं तकारः हृत् नमः एतयोरवसा
२८ नेचतुर्थीविभक्तिसहितं स्वदर्शनपदं तथा चतुर्थ्यंतमस्त्रपदं फट्शाहांतमन्त्राश्रमनामनुनाश्रस्त्रमनु
यादशाहरितोदिषाः कलयेत् बध्नीयादित्यर्थः ५६ प्रकृतं न्यासजातमुपसंहरन्वाग्निमपटलेवक्ष्यमा
णं ध्यानं सूचयति इतिविधायसमस्तविधिंजनास्तिनिविनाशविधानविशारदं कृतिविस्तरणमजंम
27 नविग्रहं स्मरतगोपवधूजनवल्लभं ५७ नरः गोपवधूजनवल्लभं कृष्णं स्मरतु किं कृत्वा इति पूर्वो
क्तप्रकारेण समस्तविधिं समग्रन्यासादिकं विधाय कृत्वा कीदृशं कृष्णं जनानामस्य निस्तिनिप्रलय
करणं च तंत्रं तथा श्रुतिगमं उपनिषन्मात्रगम्यं नचौपनिषदं पुरुषं पृच्छामीति श्रुतेः पुनः कीदृशं
अजं षड्भावविकारशून्यं तथा मंत्रात्मकस्वरूपमित्यर्थः ५८ इतिश्रीमद्विद्येश्वरविरचितायां क्रमदीपि
काटीकायां द्वितीयः पटलः समाप्तः ॥ अथ स्मरतगोपवधूजनवल्लभमित्यनेन सूचितं मंत्रदयस्याथा
रणं श्रीगोपीनाथध्यानमाह अथ प्रकटसौरभोद्गलितमाध्विकोत्फुल्लसत्प्रसूननवपल्लवप्रकरन २७

प्रशाखैर्द्रुमैः प्रफुल्लनवमंजरीललितवल्लरीवेष्टितैः स्मरेच्छिशिरितं शिवं सितमतिस्त्वृंदावने १
मुखन्यासजातकरणानंतरं सितानिर्मलामतिर्यस्य स शिवं कल्याणं वृंदावनं स्मरेत् कीदृशं वृंदा
वनं द्रुमैः शिशिरितं शीतलीकृतं कीदृशैः द्रुमैः प्रकटं उत्कृष्टं सौरभं च उद्गलितं माध्विकं च येषां च येषा
मेतादृशानि चनानि उत्फुल्लपुष्पाणि च तथोक्तास्तेन नवपल्लवास्तेषां प्रकरः समूहस्तेन नम्राः शा
खा येषां तैः प्रकटसौरभाकुलितपतंगैर्गोल्लसदिति पाठे प्रकटसौरभेणाकुलितानि चनानि भृं
गैः शोभमानानि पुष्पाणि येषु तादृशास्तेन वपल्लवाश्चेति विग्रहः पुनः कीदृशैर्द्रुमैः प्रफुल्ला विकसि
ताश्च ला नवमंजर्यश्च ताभिर्मिलिता मनोहराश्च ता वल्लर्योऽग्रशाखाश्च तासां वेष्टितानि येषु तैः १ विकासि
सुमनोरसास्वादनमंजुलैः संवरच्छिलीमुखमुखोद्गतैर्मुखरितांतरं हृष्टैः कपोतशुकसारिकापरभृ
तादिभिः पत्रिभिर्विराणितमितस्ततोध्वजगणाङ्कुरत्वाकुलं २ पुनः कीदृशं वृंदावनं संचरंतो भ्रमंतो
ये शिलीमुखा भ्रमरास्तेषां मुखेभ्य उद्गतैः समुद्गतैर्हुंकारनादैर्मुखरितं शब्दायमानमंतरं मध्यं यस्य
तत् कीदृशैर्हृष्टैः विकासिन्यो याः सुमनसः पुष्पाणि तेषां रसो मधु तस्य यत् आस्वादनं लोहतं
तेन मंजुलैर्मनोहरैः पुनः कीदृशं वृंदावनं कपोतादिभिः पारावतादिभिः पत्रिभिः पक्षिभिरत

कः मः
दाः
२८

स्नतो विराजितेन शोभायितं तथा भृजगणशब्दैर्वो मधुरास्तेषां ध्वनिस्तेनाकुलं व्याप्तं २ कलिंदजाहितस्थल
ह्रहरिविसृत्वरावाहिभिर्विनिद्रसरसीरुहोदररजस्सुयोद्धस्रैः प्रदीपितमनोभवव्रजविलासिनी
यासंसाविलोलनपरैर्निषेदितममारतं मारुतैः ३ कीदृशं हे दावनं मारुतैः अनारतं सर्वदा निषेवितं
कीदृशैर्मारुतैः कलिंदजा हिर्यमुनायाः स्थलं त्योयालहर्यस्तासां विप्रुषो जलकणिकास्तावाहिभिः
पुनः कीदृशैः विनिद्राणि विकसितानि यानि सरसीरुहाणि तेषां पङ्कदरं तत्र योरजश्चयः परागसमू
हस्तेन उद्धुरैः पुनः कीदृशैः प्रदीपितमनोभवाः याः व्रजविलासिन्यस्तासां यानि वस्त्राणि तेषां वि
लोलने तत्परैः विशेषपात्रयेण क्रमात् कीतसौगंध्यमांद्यान्युक्तानि ३ प्रवालनवपल्लवं मरकतछ
टवज्रमौक्तिकप्रकरकोरकं कमलरागनानाफलं स्थविष्ठमखिलर्तुभिः सततसेवितं कामदं त
दंतरपि कल्पिकांघ्रिपमुदंचितं चिंतयेत् ४ तदेतद्वृंदावनमध्ये कल्पिकांघ्रिपमपि कल्पवृक्षम
पि चिंतयेत् कीदृशं उदंचितं उच्चैस्तरं तथा स्थविष्ठं स्थूलतरं तथा प्रवालमेव विद्रुममेव नवप
ल्लवं यस्य तथा मरकतानीलमणयः एव छदाः पत्राणि यस्य तथा च वज्राणां हीरकाणां मौक्तिकानां
च ये प्रकराः समूहास्त एव कोरकाः पुष्पकलिका यत्र तथा कमलरागाः पद्मरागमणय एव नाना २८

28

विधानिफलानि यत्र तथाश्राविलैः षड्भिरपि ऋतुभिर्वसंतरादिभिः सेवितं सर्वदाश्रायितं एतेन
नानाविधफलाद्यन्वितत्वमपि सूचितं भवति तथा कामदं पूर्वाभिलाषितप्रदं ४ स हेममणि
शिखरावलेरुदितभानुवद्भासुरामधोस्य कनकस्थलीममृतसीकरस्राविणीः प्रदीप्तमणिकुट्टि
मांकुसुमरेणुपुंजोज्ज्वलं स्मरेत्सुनरं तद्गतो विगतषट्तरंगो बुधः ५ बुधः अतंद्रितः अतलसः
सन् अस्य कल्पवृक्षस्याधस्तात् कनकस्थलीं पुनः स्मरेत् किंभूतां सशोभमाना हेमशिखराव
लिः स्वर्णशृंगपंक्तिर्यास्मिन् तस्मात् उदयाचलात् उदितभानुवत् भासुरं स हेमशिखरावलेरु
दितेति पादे शोभनानि हेमशिखराणि यत्र एतादृशश्च अचले उदितभानुवद्भासुरां कनकस्थलीम
पि स्मरेदिति संपिण्डार्थः अस्याश्च षट् कीदृशस्य अमृतस्य सीकराः तान् स्रवतीति तस्या कीदृशीं क
नकस्थलीं प्रदीप्तमणिभिः कुट्टिमां बद्धभूमिं परागसमूहैः शोभमानां तथा विगताः षट्तरंगाः
कामक्रोधादयः अशनापिपासाशोकमोहजरामृत्यवो वा यस्याः सकाशात् तां ५ तदन्तकुट्टि
मतिविष्टमहिष्ठयोगपीठे स्फुटपद्ममरुणं कमलं विचिन्त्य उद्यद्विलोचनसरोधिमनुष्यमध्ये
सं चिंतयेत्सुखनिविष्टमायो मुकुन्दं ६ तस्याः कनकस्थल्या यदंतः कुट्टिमं रत्नबद्धाभूमिस्तत्र

क्र· म·
दी·
२९

निविष्टं स्थितं अष्टवमहिष्टं महत्तमं एवंविधं योगपीठं तत्र अष्टपत्रे अरुणाम्रारक्ते अनपवउघंघ्नासोविलो
चनः सूर्यश्च तत्र रोपितं सदृशां कमलं विचिंत्य अष्टपत्रात्मध्यकमलस्य मध्ये मुकुंदं के चिंतयेत् कीदृशं
सुखासीनं ८ सुत्रामरत्नदलितांजनमेघपुंजप्रत्यग्रनीलजलजसमानभासं स्निग्धविनीलघनकों
विनीलघनकुंचितकेशजालं राजन्मनोज्ञशितिकंठशिखंडचूडं ७ कीदृशं मुकुंदं सुत्रामरत्नानि
इंद्रनीलमणयस्तद्दलितांजनं घृष्टकज्जलं च मेघपुंजश्च नवीननीलपद्मं च एतेषां समानाभा दीप्तिर्यस्य
तं तथा सुस्निग्धाः श्लक्ष्णा नीला घना निविडाः कुंचिताः कुटिला केशास्तेषां जालं यस्य तं तथा राजन्म
नोज्ञशितिकंठशिखंडं मयूरपिच्छं च तदेव चूडायां यस्य तं ७ रोलंबलालितसुरद्रुमसूनकल्पितोत्तं
समुत्कचनवोत्पलकर्णपूरं लोलालकस्फुरितभालतलप्रदीप्तगोरोचनातिलकमुज्ज्वलचिल्लिमा
ले ८ पुनः कीदृशं रोलंबेन भ्रमरेण लालितं च तत् सुरद्रुमसूनं पुष्पं च तेन कल्पितः उत्तंसः शि
रोभूषणं येन तं तथा उत्कचं विकसितं च तत् नवोत्पलं च तदेव कर्णपूरं कर्णाभरणं यस्य तं तथा
चंचलालकैः शोभमाने ललाटतले प्रदीप्तं गोरोचनातिलकं यस्य तं तथा उज्ज्वला उद्दंडा चिल्लि
मालाभ्रूलता यस्य तं ८ आपूर्णशारदगतांकशशांकबिंबकांताननं कमलपत्रविशालनेत्रं २९

वक्त्रस्फुरन्मकरकुंडलरश्मिदीप्तगंडस्थलीमुकुरमुन्नतचारुनासं ५ पुनः कीदृशं आस्यं संपूर्णः
शारत्संबंधी शारदः गतांको निष्कलंको यः शशांकबिंबस्तद्वत्कांतमाननं यस्य तं तथा कमलपत्र
वत् विशाले नेत्रे यस्य तं तथा रत्नैः स्फुरंती ये मकराकारकुंडले तयोः रश्मिभिर्दीप्तगंडस्थलेव मु
कुरो दर्पणो यस्य तं तथा उन्नतचारुनासा यस्य तं ५ सिंदूरसुंदरतराधरमिंदुकुंदमंदारमंदहसित
द्युतिदीपिताशं वन्यप्रवालकुसुमप्रकरावतंसग्रैवेयकोज्ज्वलमनोहरकंबुकंठं ९ पुनः कीदृ
शं सिंदूरवत्सुंदरतरोऽधरो यस्य तं तथा इंदुश्च कुंदपुष्पाणि च मंदारपुष्पाणि च तद्वर्णं यन्मंदह
सितं तस्य द्युत्या दीपिता आशा दिशो येन तं तथा वन्यानि प्रवालकुसुमानि तेषां प्रकरोपसमूहे
न च वक्ष्यमाणग्रैवेयकेकंठाभरणेन उज्ज्वलो देदिप्यमानो मनोहरः कंबुवत् शंखवत् त्रिरेखां
कितः कंठो यस्य तं ९ मत्तभ्रमद्भ्रमरजुष्टविलंबमानसंतानकप्रसवदामपरिष्कृतांसं हारा
वलीभरणराजितपीवरोरोव्योमस्थलीलसितकौस्तुभभानुमंतं ॥ पुनः कीदृशं मत्ताः भ्र
मंतश्चरंतो ये भ्रमरास्तैर्जुष्टं सेवितं तथा विलंबमानं यत्संतानकपुष्पदाम तेन परिष्कृतः स्व
लंकृतः अंसः स्कंधो यस्य तं तथा हारावल्या च भरणेन नक्षत्रसमूहस्तेन राजितं पीवरं मांसलं य

क॰ म
दी॰
२

30

रुचिरहृदयं तदेव व्योमस्थली तत्र लसितः प्रसृतकान्तिकौस्तुभ एव भानुमान् सूर्यो यस्य तं अन्येन व्यो
मस्थलीविलसितकौस्तुभभानुश्रुताभ्यामुक्तमित्याहुः अत्र नक्षत्रगणसूर्ययोरसंबद्धत्वान्नेयमुपमा
किन्तु रूपकालंकार एव वस्तुतस्तु भूतोपमैवात्राभिमता बहुशो दृष्टत्वात् तथा चैककाले द्वयो रि
वात्र शोभा लभ्यते ॥१॥ श्रीवत्सलक्षणमलांछितवक्षसं तमाजानुपीनपरिवृत्तसुजातबाहुं आब
न्धुरोदरमुदारगभीरनाभिं भृंगांगनानिकरमंजुलरोमराजिं ॥२॥ पुनः कीदृशं श्रीवत्साख्यं यल्ला
ञ्छनं लांछनं तेन सुललितं सुवक्षं तथानुन्नतस्कंधं तथाजानुव्यापिताः पीवरतराः परिवृत्ताः क्र
मवलिताः सुजाता दोषरहिता बाहवो यस्य तं तथा आबंधुरं रतिम्नोन्नतमुदरं यस्य तं यद्वा आ सम
न्तात् बंधुरं सुष्ठि ग्राह्यमुदरं यस्य तं यद्वा आबंधुरं सर्वतो मनोहरोदरं तथा उदारा प्रख्याता गम्भीरा
नाभिर्यस्य तं तथा भृंगांगनानां निकरः समूहस्तद्वत् मंजुला मनोहरा रोमपंक्तिर्यस्य तं क्वचिन्मंजु
लेत्यपि पाठः ॥२॥ नानामणिप्रघटितांगदकंकणोर्मिग्रैवेयसारसननूपुरतुंदबंधं दिव्यांगराग
परिपिंजरितांगयष्टिमापीनवस्त्रपरिवीतनितंबबिंबं ॥३॥ नानामणिभिः प्रघटिताः संबद्धा अं
गदाः बाहुवलयास्तथा कंकणाः तथा उर्मियो मुद्रिकाः तथा ग्रैवेयकं ग्रीवालंकारस्तथा सारसनो ३०

स्त्वद्बंटिकासहितो नूपुरौ मंदं बंधः उदरबंधनार्थं सुवर्णदोरकं यस्य तं तथा दिव्यः परमोत्कृष्टो
योऽङ्गरागो विलेपनं तेन परिपिंजरिता नानावर्णा अंगयष्टिः गलता यस्य तं तथा आपीनैः अतिशयपीनैर्य
द्धस्तैस्तैः परिचेष्टितोऽनितंबबिंबो येन तं १२ वाहूरु जानु मनूहत्तम मनोहरं जंघे कांता अत्र नखप्रपदं निंदितकू
र्मकांतिं माणिक्यदर्पणलसन्नखवरांतिरंजदंगुलिक्षदनसुंदरपादपद्मं मत्स्यांकुशारिदरकेतुय
वा ज्ञवज्ञसंलक्षितारुणाकरांकितलाभिरामं १४ पुनः कीदृशं वाहूणी सुंदरे जंघे जानुनी यस्य तां
तथा अत्र वृत्ते क्रमवलिते मनोज्ञे मनोहरे जंघे यस्य तं कांतौ उन्नतौ यौ प्रपदौ पदाग्रे ताभ्यां निंदिता
भर्त्सिता कूर्मस्य कच्छपस्य कांतिर्येन तं तथा माणिक्यमयो यो दर्पणास्तद्वत् उल्लसंती यानत्वश्रेणिस्तया
रंजितौ याग्रंगुलयस्ताप वक्षदनातिपत्राणि तैः सुंदरं पादपद्मं यस्य तं तथा मत्स्यो मीनः अंकुशः प्रसि
द्धः अरिः चक्रं दरः शंखः केतुर्ध्वजः यवः प्रसिद्धः अब्जं पद्मं वज्रं कुलिशाकारास्त्रिकोणाः एतैः संलक्षितं
सम्यक् चिह्नितं पदरुणां करांगुलिस्तलं तेन अभिरामं सर्वजनप्रियं १४ लावण्यसारसमुदायविनिर्मि
तांगसौंदर्यनिंदितमनोभवदेहकांतिं १४ लावण्यस्य सौंदर्यस्य सारो उत्कृष्टभागस्तेषां समुदायेन विनिर्मि
तं यदंगसौंदर्यं तेन निंदिता मनोभवस्य देहकांतिः शरीरशोभा येन तं षट्पद्यः श्लोकोयं

कृ॰ म॰
दी॰
३१

आस्यारविंदपरिपूरितवेणुरंध्रलोलकरांगुलिसमीरितदिव्यरागैः शश्वद्द्रवीकृतविकृष्टसमस्तजंतु
संतानसंततिभिरंतमहांबुराशिसमहं परंपरायेन तं केः आस्यारविंदेन मुखपद्मेन परिपूरितानि या
नि वेणुरंध्राणि तेषु लोलं लोलाः याः करांगुलयस्ताभिः समीरिता उत्यादिता ये दिव्यस्वरा रागाः उत्कृष्टस्वरा
स्तैः पुनः कीदृशं शश्वन्नंतं अपरिमितं यथा स्यात्तथा द्रवितदेवब्रह्मराशिस्तं १५ गोभिर्मुखांबुजविलीनविलोचना
भिरूधोभरस्खलितनंदगमंदगाभिः दंताग्रदष्टपरिशिष्टतृणांकुराभिरालंबिवालधिलताभिरथाभि
वीतं १६ पुनः कीदृशं श्रवणवेणुरवाकर्णनानंतरं गाभिः अभीभितं सर्वतो वेष्टितं किंभूताभिर्गोभिः
मुखांबुजे परमेश्वरमुखपद्मे विलीने संबद्धे लोचने यासां ताभिः तथा ऊधोभरेण स्तनगौरवेण स्ख
लितं मंथरं सालसं मंदं च यथा स्यात्तथा गच्छंति ताभिः तथा दंताग्रे दष्टः परिशिष्टो भक्षणावशिष्ट
स्तृणांकुरो याभिस्ताः ताभिः तथा आलंबिन्यो लंबायमानाः बालधिलताः पुच्छलता यासां ताभिः १६
संप्रस्नवस्तनविकर्षणपूर्णनिश्चलास्यावटद्रवदरितफेनिलसृक्वमनोपैः वेणुप्रवर्त्तितमनोहरमंदगीति
दत्तोर्ध्वकर्णयुगलैरपि तर्णकैश्च १७ पुनः कीदृशं तर्णकैरेकवार्षिकवत्सैश्च अभिवीतमिति पूर्वश्लोकादत्र वर्त्तनीयः कीदृशैस्त ३१
र्णकैः सत्त्ववाः सद्यःपाययेत्तनास्तेषां विकर्षणं दंतोष्ठेनाकर्षणं तेन पूर्णानि निश्चलानि आस्यावटानि मुखविवराणि तेषु दरितं पतत्फेनिलं सृक्वं तेन मनोपैर्मनो

हरेः तथा वेणुना प्रनर्तिता वालिता या मनोहरा मंदावल्ली यामीनीति गीतेन नववृत्तानि उच्चकर्णयुगलानि ये
षां तैः १७ प्रत्यग्रशृङ्गमस्तकसंप्रहारसंरंभवलानविलोलखुराग्रपातैः आमेडितैर्बहुलसान्द्रगले
हुंकृतैश्च वत्सतरवत्सतरीनिकायैः १८ पुनः कीदृशं वत्सतरास्ते वार्षिकावलीवर्दाः वत्सतरास्ते
वार्षिका गावस्तेषां समूहैस्तैरभिवीतमिति हर्षेण त्वयः कीदृशैः प्रत्यग्राणि नवीनानि शृङ्गाणि येषु
एवंविधानि यानि मस्तकानि तेषु यः संप्रहारः युध्यद्वत्सानामभिघातस्तेन यः संरंभः क्रोधाति
शयस्तेन यद्वलानं वा वल्गनं तेन विलोलाः अनवस्थिताः खुराग्रपाता येषां तैः तथा आमेडितैः सन्ति
रैः तथा बहुलाश्च तिशयिताः सान्द्रा गलकंबला येषु एवंभूता गला येषां तैः तथा उदग्राणि उद्ध
ताग्राणि पुच्छानि येषां तैः १८ हंभारवकुम्भितादिग्वलयैर्महद्भिरुपदानैः पृथुककुद्भरभारखिन्नैः
उन्नमितकण्ठनिपुटीपरिपीनवेशधानाम्नतोदनविकाशिविशालघोणैः १९ पुनः कीदृशं म
हद्भिरुत्तामिर्हर्षैः रपि अभिवीतं कीदृशैर्हर्षैः हंभारवेण व्याप्तं जितं प्रान्ते स्थानं तं दिग्वलयं येषु तैः तथा
पृथवोऽतिशयिता ये ककुद्भराः प्रवरगलभराः स एव भारस्तेनातिखिन्नैः तथा उन्नमिताः सङ्कीर्णताः
याश्शोत्रपुटयस्ताभिः परिपीतं समादराकर्णितं यद्वंशाध्मानं लक्षणम्रतं तेन उद्धृता। उन्नमिता वि

कृ· क·
टी·
३२

काशिन्याः प्रस्फुटा विशाला दीर्घा योणा नासा येषां तैः १५ गोपैः समानगुणशीलवयोविलासवेशैश्च
मूर्छितकलस्वरवेणुवीणैः मंद्रोच्चतारपटुगानपरैर्विलोलदोर्वल्लरीललितलास्यविधानदक्षैः १
पुनः कीदृशं गोपैश्च अभिवीतं गुणोदार्यादिः शीलं धैर्यादि। वयो बाल्यादि। विलासः क्रीडनं वेशः आभ
रणं संस्थानविशेषो वा समानास्तुल्या गुणशीलादयो येषां तैः तथा वेणवश्च वीणाश्च वेणुवीणं
मूर्छितः मूर्छनां प्रापितः कलोऽव्यक्तमधुरः स्वरो रागो यत्र एतादृशं वेणुवीणं येषां तैः तदुक्तं
स्वरः संमूर्छितो यत्र रागतां प्रतिपद्यते मूर्छनामिति तां प्राहुः कवयो ग्रामसंभवां सप्तस्वरास्त्रयो
ग्रामा मूर्छनास्त्वेकविंशतिरिति तथा मंद्रं नीचस्वरं उच्चं अतिशायितं तारं पूरयति विशेषेण स्पष्टं
यद्गानं तत्र परैः आसक्तैः तथा विलोलाश्चंचला या दोर्वल्लर्यो बाहुलतास्ताभिर्ललितं मनोहरं यन्
नृत्यं तस्य विधाने दक्षैः कुशलैः १ जंघांतपीवरकटीरतटीनिबद्धव्यालोलकिंकिणीघटार
णितैरटद्भिः मुग्धैस्तरक्षनखकल्पितकंठभूषैरव्यक्तमंजुवचनैः पृथुकैः परीतं १६ पुनः की
दृशं पृथुकैर्बालकैः परीतं अभिवीतं कीदृशैर्बालैः जंघांते जंघासमीपे पीवरायाः कटीरतटीक ३२
टिस्थली तस्यां निबद्धा व्यालोला चंचला या किंकिणीघटा मेखलाकलापस्तेन रणितानि शब्दि

32

तानियेषुतैः तथाअरुणैः सरागाढ्यैः तथाअरुणैर्मनोहरैः तथातरलनखैर्व्याप्तनखैः कान्तिमताकंठ
भूषाकंकवालेकरौयेषांतैः तथाअव्यक्तानिअस्पष्टानिमंजूनिमनोहराणिवचनानियेषांतैः २१ अथ
सुललितगोपसुंदरीणांपृथुनितंबविशेषनितंबमध्यराणांगुरुकुचभरभंगुरावलग्नत्रिवालिविराजि
तरोमराजिभाजां २२ पुनःकीदृशः अथचमनोहरगोपस्त्रीणांआलीभिःश्रेणीभिःसमंतात्सर्वतःसर्व
दासेवितमित्यष्टमश्लोकान्वयः कीदृशीनांगोपसुंदरीणां पृथुःबृहत्नूनिविशेषानिविजेयानिते
वः कटिपश्चाद्भागस्तेनमंथराणांगमनाशक्तानां तथापृथुरत्निशायिनोयःकुचभरःस्तनगौर
वंतेनभंगुरंदीर्घनम्रंयद्वलग्नंमध्यप्रदेशस्तत्रयात्रिवलीतत्रविजृंभितावितताारोमराजिस्तांभजं
तेआश्रयंतेतासां २२ नदतिहविरवाहवेणुवाद्यामृततरसपल्लविनांगजांघ्रिपानांमुकुलविस
रस्फुटरोमांचमसमलंकृतगात्रवल्लरीणां २३ पुनःकीदृशीनां नस्यहृत्सस्पृहान्तिकचिर
वहेणुवाद्यवेणुनादःसएवअमृतरसअमृततुल्यंजलंतेनपल्लवितःहृद्युन्मावःअंगजांघ्रिपःका
महृद्योयासांताःतासांअंघ्रिपस्यनिपाटपल्लवितःअंगजांघ्रिर्येषांतेनिकुलविशेषणं पुनःकी
दृशीनांमुकुलानांविसरःसमूहस्तद्वत्स्फोटःप्रादुर्भूतोयोरोमांचस्तेनसमलंकृतागात्र

क॰म
दी॰
३३

33

वल्लरीदेहलतायासां ताः तासां २३ तदतिहविरमंदहासचंद्रातपपरिजृंभितरागवारिराशेः तरल
तरतरंगभंगविभ्रमप्रकरसमभ्रमविज्ञसंततानां २४ पुनः कीदृशीनां तस्यकृतस्याग्रतिरुचिरोयोमं
दहासस्तएवचंद्रातपस्तेन यस्लेः उल्लसितो यो रागसमुद्रस्तस्यतरलाग्रतिचंचलायेतरंगभंगालहरीप्रांता
स्तेषां याविभ्रमो जलकणास्तेषां प्रकरः समभ्रमविज्ञः तालितभ्रमजलविज्ञस्तेन संततानां व्याप्तानां २४
तदतिललितमंदचाल्लिचापवल्लततिपातितेक्षणमारवाणहष्टा दलितसकलमर्मविकलांगप्रस्त
तसज्ञः सहवेपथुव्यथानां २५ कथंभूतानां तस्यकृतस्याग्रातिशायेनललितेमंदेनातिदीर्घपद्विल्लि
चापंभूलताधनुस्तस्याकुंक्ष्तनाभिनिष्पातितानि ईक्षणानिकटाक्षास्तएवमारवाणास्तेषां हष्ट्याग्र
निपातेनदलितंखण्डितंयत्सकलमर्मतेनविकलेविकलांगयंदगात्रप्रस्ततावयागाज्ञः सहावेप
थुव्यथाकंपवेदनायासां ताः तासां २५ तदतिरुचिरकमंरूपशोभाभरतरसमानविधानलाल
साभ्यां प्रणयसलिलप्ररवाहिनीनमलसविलोलविलोचनांबुजाभ्यां २६ पुनः कीदृशीनां प्र
णयेनप्रेम्णासलिलप्ररजलप्रवाहंवहंतितच्छीलानां काभ्यां सलिलेनेसविलासेलोलेयेविलो
चनांबुजेताभ्यां कथंभूताभ्यां तस्यकृतस्याग्रतिरुचिरंयकमंशृंगारचेष्टाविशेषात्मकं रूपशोभाका ३३

मितीमनोहरास्वरूपस्य कांतिः स्तल्लवणामृततरसयोः पानेसादरावलोकनंनहिधानेकरणोलालसा
श्रुतिस्तस्याययोस्ताभ्यां नदतिसुभगकस्यैवनिपादेनस्य २८ कुलस्यश्रुतिसुभगाश्रुतिसुंदराकर्णाकम
नीयास्वरूपशोभेत्यर्थः अन्येनसुभगकस्यश्रोत्रौसौंदर्यवाचिनावेवाग्रहीनेतद्रूपस्याङ्गतचक्षुयोत
नायेत्याह २६ विस्रंसकबरीकलापविगलत्फुल्लप्रसूनस्रवन्माध्वीलेपदचंचरीकचयाध्यासंसेवि
तानांमृदुः मारोन्मादमदस्खलन्मृदुगिरामालोलकांच्युल्लसन्नीवीविश्लथमानचीनसिचयान्ता
विनिंनवाचिषा २७ पुनःकथंभूतानां विस्रंसनस्खलशयः कबरीकलापः केशपाशस्तस्मात्वि
लेगतियानिफुल्लप्रसूनानितेभ्यः स्रवंतीयामाध्वीपुष्परसस्तत्रलेपदाश्रयासक्तायेचंचरीकास्ते
षांचयस्तमाह वारंवारंसंसेवितानां संश्लिष्टानां तथामारःकंदर्पस्तस्मादुन्मादस्तेनयोमदउन्मत्ततातया
स्खलंतीअस्पष्टामृदुः कोमलागीर्यासांताः तासां उन्मादमादोशृंगारविशेषोशृंगारतिलकेप्रसि
द्धाविति कोचेत् तथाआलोलायाकांचीमेखलातयाउच्छ्वसंतोशिथिलीभवंतीयानीवीवस्त्र
ग्रंथिस्तयाविश्लथमानंपश्चीनंदेशोत्पन्नंसितवर्णंवल्कलंवस्त्रंतेनसानेमध्येशाविर्भूतानितं वाल्लिहया
सातानां २७ स्खलितललितपादांभोजमंदाभिपातक्वणितमणितुलाकोयाकुलाशामुखा

क्रं॰म
दी॰
२५

34

नां बलदधरदलानां कुञ्जलत्पक्ष्मणाद्विद्वयसरसिरुहाणाम्मल्लसत्कुंडलानां २७ पुनः कथंभूतानां
स्खलितानि श्रान्तायत्नानि ललितानि मनोहराणि यानि पादपद्मानि तेषां मंदानि पातनं ईषत्पतनं तेना
क्वणितैर्मणिपुतलाकोटिभिर्नूपुरैः आकुलानि शब्दायमानानि आशामुखानि दिङ्मुखानि याभि
स्तासां तासां तथा वलेनिस्फुरंतिश्रुधोदलानि अधः पत्राणि यासां तासां तथा कुसुमेन मुकुलीभ
वंति पक्ष्मलानि उत्कृष्टपक्ष्मयुक्तानि आद्विद्वयसरोरुहाणि यासां तासां उल्लसंति हृदि दीप्यमाना
निकुंडलानि यासां तासां २८ ज्वाविषयसनसमीरणाभितापप्रम्लालीभवदरुणोष्ठपल्लवा
नां नानोपायनविलसत्करांबुजानामालीभिः सततं निषेवितं समंतात् २९ पुनः कथंभूतानां ज्ञा
धिष्ठाश्रनिदीर्घयेष्वसनसमीरणाः श्वासवायवस्तैर्यश्च अभितापस्तेन प्रम्लानीभवंतश्चरुणाः ओष्ठप
ल्लवा यासां तासां तथा नानोपायनैर्विलसंति करांबुजानि यासां तासां २९ नासामापतलो
लनीलनयनव्याकोचनीलोत्पलस्राभिः संपरिपूजितां विलतत्त्व नाना विलासास्पदं तनुमध्या
ननपंकजप्रविलसन्माधीरसास्वादिनी विभ्राणं प्रणयोन्मदाद्विमधुकृत्मालां मनोहारिणी ३० २५
पुनः कथंभूतं मुकुंदं तासां गोपीनां आननानि दीर्घाणि लोलानि यानि नीलनयनानि तान्येव व्या

कोषाणि विहसितानि नीलोत्पलानि तेषां स्रग्भिर्मालाभिः संपरिपूजिता अविलासनतुर्यस्यान्तं तथाशता
येन उक्तं तमदेये अस्लिणीनह्यस्त्रणीमधुकृत्स्नानां बिभ्राणं कण्ठभूतां मालां तासां गोपिकानां सम्ध्याति
मनोहराणि प्राननपंकजानि तेभ्यः प्रविलसनुस्तवनुयोमाधीरसोमकरंदस्तमास्वादयितं शीलमस्याः
स्तातां यद्वा तस्य मंस्थ यदाननपंकजमित्यादिविग्रहः २० अथ भगवदुपासकब्रह्मादिदेवानां ध्यान
माह गोपीगोपपशूनां बहिः स्मरेदग्रतोस्य गीर्वाणवटी वित्तार्थिनी विरञ्चिनयनतयानमन्तुष्टु
विंकास्तोत्रपरं २१ अस्य परमेश्वरस्याग्रतो अग्रे तथा गोपीगोपपशूनां बाहिर्गीर्वाणानां देवानां चटोस
मर्हं स्मरेत् किंभूतां वित्तज्ञानं प्रष्ठितं शीलमस्याः स्तातां यद्वांच तार्थिनी तथा ब्रह्ममहेसंप्राक्
मृग्रेयां तथा परमेश्वरस्तुतिपरां २१ तद्दक्षिणतो स्रुतिनिकरं धर्मवां बमाम्नायपरं योगीन्द्रानथ
पृष्ठे ब्रह्मत्तमाणान् समाधिनासनकायात् २१ तस्य परमेश्वरस्य दक्षिणतो दक्षिणभागे स्रुतीनां
निकरसमूहं स्मरेदिति मवेणसंबंधः कीदृशं आम्नायो वेदाध्ययनं तत्र परमेकाग्रं तथा धर्म
स्य मोक्षधर्मस्य ज्ञानस्य वां कायस्यतां तदुक्तं याज्ञवल्क्येन अयं तु परमो धर्मो यद्योगेनात्मदर्शन
मिति अथास्य परमेश्वरस्य पृष्ठे पश्चाद्भागे सनकादीन् योगीश्वराम् स्मरेत् कीदृशान् प्रेमाद्वे

35

कुपरान् तथा समाधिना उपलक्षितान् ३२ सर्वेसकांतानथ पन्नगसिद्धगंधर्वविद्याधरवारणांश्च स
किंनरानप्सरसश्च मुख्याः कामार्थिनो नर्तनगीतवाद्यैः ३३ अथ परमेश्वरस्य सव्ये वामभागे सकांतान्
सस्त्रीकान् यक्षादीन् संस्मरेत् कथंभूतान् किंनरैः सहितान् तथा नर्तनगीतवाद्यैः करणभूतैः कामार्थि
दः तथा मुख्याः अप्सरस उर्वशीप्रमुखाः स्मरेत् ३३ शंखेंदुकुंदधवलं सकलागमज्ञं सौदामिनीततिपि
शंगजटाकलापं तत्पादपंकजगतामचलां च भक्तिं वांछंतमुज्झितनरान्यसमस्तसंगं ३४ नानावि
धश्रुतिगणान्वितसप्तरागग्रामत्रयीगतमनोहरमूर्छनाभिः संप्रीणयंतमुदिताभिवसंमहत्यास
चिंतयेन्नभसि ध्यानमुक्तमुनींद्रं ३५ नभसि आकाशे ध्यानयुक्तं नारदं स्मरेदित्यन्वयः कथंभूतं शंखा
दिवद्धवलं निर्मलं तथा संपूर्णागमज्ञं तथा सौदामिनीनां विद्युतां ततिर्व्याप्तिस्तद्वत्पिशंगो जटानां
कलापः समुदायो यस्य तं तथा परमेश्वरपादपद्मविषयिणीं अचलां भक्तिं वांछंतं तथा अतिशयेन
उज्झितः अन्येषां सर्वेषां विषयाणां संगो येन तं तथा नानाविधः षड्विंशाद्भेदो यः श्रुतिगणो नादस
मूहस्तेनान्विता ये सप्तरागा विशादर्षभगांधारषड्जमध्यमधैवत पंचमाख्याः तेषु त्रयाणां ग्रामाणां ३५
समाहारः ग्रामत्रयी तत्संगताः आसामामनोहरमूर्छनाः एकविंशतिप्रकारास्ताभिः स्वकृतसंप्रीणयंतं

कथंभक्ताभिर्मूर्छकनाभिर्महत्यासमन्तेत्रिनामाकयानारदवीणयाऽऽदिताभिः २५ इति ध्यानं अथा-
ध्यानमुपसंहरन्नात्मपूजाक्रममाह इतित्वाध्यात्मानंपद्मविवादपीनेंदतनपंप्ररोवुधद्मैवार्द्धाप्रभृति
भिरविंद्योपहृतिभिः यजेद्रूपो भक्त्यास्ववपुषिबहिष्ठैस्वविभवैर्विधानेनक्रमोपयमनलसांनिध्या-
कृदप्य २६ इतिप्रागुक्तध्यानेनपद्मविवारत्नमाश्रयवविशदाधीर्यस्य सः आत्मानंनंदतनयरूपंवासुदेवा-
भिन्नंध्यात्वापुरःप्रथमतोबुद्ध्यैवमनसैवअर्घ्यंप्रभृतिभिरुक्ताभिरुपहृतिभिर्मानसोपचारैःप्रथाविधिय-
जेत्पूजयेदित्य र्थः पुनरपिस्ववपुषिबहिष्ठैर्विभवैरुपचारैःपूजयेत् अथवयंतत्स्वविधानंबहिष्ठविभ-
वार्चनप्रकारंस्वमः कीदृशंविधानं परमेश्वरस्यअनलसांनिध्यकृत् २७ तत्रादौशंखपूरणप्रकारमाह आ-
रच्यम्भविगोमयाम्भयास्थंडिलंनिजमन्त्रविष्टरं न्यस्यतत्रविहितास्यदंभसाशंखमस्त्रमन्त्रनाविशोध-
येत् २८ स्वविगोमयसहितेनांभसास्थंडिलेपूजास्थलंआरच्यउपलिप्यअम्भसास्थंडिलेनिजंविष्टरंकंब-
लंन्यस्यतत्रविष्टरेकृतास्पदःकृतासनःअंभसाअस्त्रमन्त्रेणामूलमंत्रास्त्रमंत्रेण अस्त्रायफट्इतिमंत्रे-
णावाविशोधयेत्प्रक्षालयेत् २९ तत्रगंधस्रुमनोक्षतानतप्पातितिपिहृदयमंत्रमुच्चरन् पूरयेद्विमल-
पाथसामधीरत्नैःप्रतिगतैःश्रीरांतिगैः ३० तत्रवामभागकृतत्रिकोणस्थापितनसाधारणशंखस्थधीः

क्र· म·
दी·
३९

हृदयमंत्रंमूलमंत्रमाहेतेहृदयमंत्रंकेवलंवाहृदयायनमः इतिमंत्रमुच्चरन्सन्नुंगंधाक्षीन्नुंगंधपुष्पाभ्यामन्नतं
डुलान्निक्षिपेत् तथाविमलेनपाद्यमानलेनपूरयेत् जलपूरणमंत्रमाह प्रतिगतैरिति प्रतिलोमपठि
तैर्मातृकाक्षरैः कीदृशैः शिरोसिशैः सानुस्वारैरित्येके स्वाहांतैरित्यपरे विवक्षापस्वाहेत्यंतैरित्यपरेके ३८
पीठशोषसलिलेषु मंत्रविद्वह्निवासरनिशाकृतांक्रमात् मंडलानिविषकंप्रवोक्तैरर्चयेद्हृदनपूर्वदी
पितैः ३५ पीठेशोषाधारपात्रेशोषःसलिलंचतत्रयथाक्रममेववह्निसूर्यचंद्राणांमंडलानिविषंमकारः कं
मस्तकन्यस्यमानः अकारः अवः श्रोत्रन्यस्यमानउकारप्रभिरक्षरैः सहितानिमंत्रवित्क्रमादर्चयेत् की
दृशैरक्षरैः वदनपूर्वैशिरसिन्यस्यमानमंत्रविष्करिनियावत्तेनदीपितैः सानुसारैरित्यर्थः प्रयोगस्तु
मंवह्निमंडलायदशकलात्मनेनमः अंसूर्यमंडलायद्वादशकलात्मनेनमः उंसोममंडलायषोडशक
लात्मनेनमः इति ३६ तत्रतीर्थमनुनाभिवाहयेत्तीर्थमस्महचिमंडलात्पुनः स्वीयहृत्कमलतोहरिं
तथागालिनींचशिखयाप्रदर्शयेत् ४० उमसहचिमंडलासकाशात्पर्यवक्ष्यमाणतीर्थमंत्रेणाकृत्वा
तत्रशोषजलेभ्यावाहयेत् तथास्वीयहृत्कमलात् हरिमावाहयेत् अथशिखामंत्रेण ३९
वक्ष्यमाणं ॥ (गालिनीमुद्राप्रदर्शयेत् वक्ताहेतुमुद्रामपि तथावामह ॥)

36

गालिनीमुद्रां प्रदर्शयेत्‌ वकाहेतमुद्रामपि तथा वामहस्ततलेदक्षिणतर्जनीतूपामावाहनमुद्राम
पिदर्शयेत्‌ ४४ तत्तल्लेनयनमंत्रवीचितं वर्मणासमवगुंठ्य दोर्भुजा मूलमंत्रसकलीकृतं न्यसेदंगकै
श्चकलयेद्दिशोःस्वतः ४५ तस्यांशंखस्यजलेनयनमंत्रेणावघट्टितं मंत्रेणातिरीक्षितं दोर्भुजाबाहुभुरेण
नवर्मणाकृमितिकवचमंत्रेणसमवगुंठ्यमदनेतरं मूलमंत्रेणसकलीकृतं सदेवतं कृतमित्यर्थः अ
मृतीकृतमित्यग्रेभिधास्यमानत्वात्‌ यद्वा मूलमंत्रसकलीकृतं मूलमंत्रांगसंबद्धं इदमेवविष्णोः
तिन्यसेदंगकैरितिकोचित्‌ वस्तुतस्त्वंगकैन्यसेन्मूलमंत्रस्यषडंगन्यासं शंखेकुर्यात्‌ दशशंख
स्यदशदिशोःस्वमंत्रेणच्छोटिकयाबध्नीयादित्यर्थः ४६ अवतादिमुद्राममृतीकृतं संस्पृशन्‌ जपतु
मंत्रमष्टशः किंचनाक्षिपत्तवर्द्धनीजालेप्रोक्षयेदिजनतत्वैतनोमुना ४७ त्रिःकरेणमनुनाविलेत
प्यासाधनेकुसुमचंदनादिकं शंखप्रक्षणाविधिः समीरितो गुरुपपद्यजनाग्रणीरिह ४८ अमंअवत
तादिमुद्रं तंतथामृतीकृतं विलसद्रूपं तान्नीतं तज्जलं स्पृशन्‌ मूलमंत्रमष्टधाः जपतु जपेत्‌ अनेनं
किंचित्‌ शंखस्थजलं वर्द्धनीजलेसदक्षिणभागस्थापितप्रोक्षणीपात्रजलेनिक्षिपेत्‌ ततस्तदने
नरस्वमनार्घ्यपात्रजलेनततनतस्वशरीरंप्रोक्षयेत्‌ अमुनावर्द्धनीघटजलेनेत्यर्थः ४९ त्रिःक

मं·म
दी·
३०

37

वेणीति तथामन्त्रनाम्नामूलमंत्रेणकुचाकारेणदक्षिणहस्तेनश्रविलंकुस्वमंचेदनादिकंसाधनेत्रिवा
वेष्टोत्तयेदित्यचयः शंखविह्वरणविधिमुपसंहरति शंखेति एष शंखविह्वरणस्य विधिः प्रकारः समी
रित उक्तः कीदृशः इह शास्त्रे शुभः तथा यतने पूजायामग्रणीः श्रेष्ठ इत्यर्थः ४२ तीर्थमंत्रमुदाहरति
गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि जलेस्मिन् संनिधिं कुरु ४४ तीर्थमंत्रस्य फ
लमाह एष तीर्थमनुः प्रोक्तो ऽङ्कुरितौघनिवारणः ४४ अथ गालिनीमुद्राया लक्षणमाह कनिष्ठांगु
ष्ठकौ सक्तौ करयोरितरेतरं तर्जनीमध्यमानामाः संहता भुग्नसज्ञिताः मुद्रैषा गालिनी प्रोक्ता शंखस्यो
परि चालिता ४५ हस्तयोरन्योन्यं कनिष्ठांगुष्ठकौ सक्तौ संबद्धौ तथा तर्जनीमध्यमानामाः संहताः अ
भुग्नाः अकुटिलाः सज्ञिताः परस्परसंयुक्ता एवं सति एषा मुद्रा गालिनी प्रोक्ता शंखस्योपरि चालिता
सती देवस्य प्रीतिं जनयेदिति शेषः ४५ अथ स्वदेहे पीठपूजाक्रममाह अथ मूर्द्धनि मूलचक्रमध्ये
निजनाथान् गणनायकं समर्च्य न्यसनक्रमतश्च पीठमंत्रैर्जलगंधाक्षतधूपदीपैः ४६ अथानंत
रं मूर्द्धनि मस्तके तथा मूलचक्रमध्ये मूलाधारचक्रे पद्माकृमं निजनाथान् स्वगुरून् गणपतिं च पू ३०
जयित्वा पूर्वोक्तन्यसनक्रमेण पीठमंत्रैराधारशक्तिमारभ्य पीठमंत्रान्तं तत्तन्मंत्रैर्जलगंधपुष्पा

ततस्तपदीपैः प्रयतेदित्युनैरशानयः ४८ प्रयजेदथ मूलमंत्रतेजो निजमूलेऽहृदये भ्रुवोश्च मध्ये
चिंतयेत्स्मरतः स्मरेत्तदेकीकृत्नमानंदघनं तडिल्लताभं ४८ पुनः अथ निजमूलेऽहृदये भ्रुवोश्च गगने
चिंतयेन्मूलमंत्रात्मकं तेजः स्मरेण कामबीजेन क्लीमित्यनेनैकीभूतं चिंतयेत् कीदृशं तेजः प्र
नेदघनं तथा विद्युत्प्रभं ४७ ततो जीवः साव्ययीकृत्यापि तन्मात्र गात्रे विन्यस्य प्रयजेदासनपूर्वैः भू
पोतैर्भूयो जलगंधादिभिरर्चां कुर्यादनुत्याचारविधानात्वयि मंत्री ४८ ततएकीभूतं तेजः पंचांगैः सा
वयवीकृत्य शरीरसंयुक्तं संपाद्य तत्र विभूतिपंजरन्यासमारभ्यांगन्यासपर्यंतं स्वशरीरे विन्यस्या
स्तनादिभूषां तेनूपवीरे देवं प्रपूजयेत् अथः पुनरपि जलगंधादिभिर्विभूतिपंजरन्यासमारभ्यांग
न्यासपर्यंतं तद्देवीमूर्त्तिन्यासं स्थानेषु न्यासक्रमेणैव तन्मंत्रैरेव पूजयेत् ४८ अथो वेणुं वदनस्थं
वक्षोदेशे वनमालां वक्षोजोर्ध्वं प्रयजेत् श्रीवत्सं कौस्तुभं वरत्नं ४९ अयोनंतरं माल्यवस्थं वेणुं प्रज
येत् वक्षोदेशे वनमालां प्रयजेत् कंठमारभ्य पादद्वयपर्यंतमवलंबिनी पत्रपुष्पमयी माला
वनमालेत्युच्यते वक्षोजयोरूर्ध्वं श्रीवत्सं कौस्तुभं च पूजयेदित्यर्थः ४९ अथ द्वादशतिलकानि
दर्शयति श्रीखंडकुंकुमसंदर्भविचर्चिताङ्गो मूलेन भालादिषु विचित्रकाणि लिखित्वा दर्पणेऽपंजरमूर्त्तिमंत्रै

क्र० म
दी०
३८

38

रनामयादीपशिखाकृतीनि ५० अथोमूर्त्तंतरं मूलमंत्रेण श्रीखंडनिस्यंदेन चंदनपंकेन चर्चितांगः तिमा
गः स्रजको भालादिषु ललाटादिषु मूर्त्तिपंजरन्यासस्थानेषु चित्रकानि तिलकानि दीपशिखाकृतीनि
अनामयाऽनामिकया मूर्त्तिपंजरमंत्रैः ॐ केशवधातृभ्यां नमः इत्यादिभिर्द्वादशभिर्मंत्रैर्लिखेत् ५० अ
थ पुष्पांजलिविधिं दर्शयति पुष्पांजलिवितनुयाद् पंचकृत्वो मूलेन पादयुगले तुलसीद्वयेन मध्ये
हृद्यादियुगलेन च मूर्ध्नि पद्मद्वंद्वेन षड्भिरपि सर्वतनौ च सर्वैः ५१ अथ पंचकृत्वः पंचवारान् पुष्पांजलिवि
तनुयात् तत्र प्रकारमाह स्वपादयुगले श्वेतकुसुमतुलसीद्वयेन मूलमंत्रेण एकं पुष्पांजलिं दद्यात् मूले
नैव मध्ये स्वहृदये हृद्यादियुगलेन श्वेतरक्तकरवीरपुष्पाभ्यां द्वितीयं पुष्पांजलिं दद्यात् मूलेनैव स्व
मूर्ध्नि श्वेतरक्तपद्मद्वंद्वेन तृतीयं पुष्पांजलिं दद्यात् मूलेनैव स्वमूर्ध्नि षड्भिरपि तुलसीद्वयकरवीरद्वय
पद्मद्वयैश्चतुर्थं पुष्पांजलिं दद्यात् मूलेनैव स्वीयसर्वतनौ सर्वैरन्यैः पुष्पैरपि पद्मादिसर्वैः प्रागुक्तैष
ड्भिः पंचमं पुष्पांजलिं दद्यादित्यर्थः ५१ अथ श्वेतरक्ततुलस्यादीनां प्रदानविभागमाह श्वेतानि दक्ष
भागे सितचंदनपंकिलानि कुसुमानि रक्तानि वामभागे रक्तचंदनपंकिलानि कुसुमानि ५२ श्वेतानि ३८
तुलस्यादीनि चंदनपंकलिप्तानि दक्षिणभागे देयानि रक्तानि तुलस्यादीनि रक्तचंदनपंकयुतानि वामभागे दे

यानि ५१ अथ धूपाद्युपचारमाह तदनु च धूपदीपौ समर्प्य पिबनयात्सुधारसैः हृत्संस्थावेवासार्घ्यं दत्त्वा समर्च
येत्साधुगंधपुष्पाद्यैः ५२ तांबूलगीतनर्त्तनवाद्यैः संतोष्य बुलकसलिलेना ब्रह्मार्पणाख्येन वनाकु
यात्स्वात्मार्पणं मंत्री ५२ धूपेम धूपदीपौ समर्प्य सुधारसैर्ब्रह्मरंध्रस्थितशशांकविगलितामृतद्र
वैः हृत्संस्थं पिबनयात्प्रीणयेत् यद्वा सुधामंत्रकृतजलैरित्यर्थः अथ सुधेवासार्घ्यं सुगंधवटिकादिद
त्त्वा साधुगंधपुष्पाद्यैः समर्चयेत् ५३ तांबूलेति अथ मंत्री तांबूलादिभिः श्रीहृत्संस्थं संतोष्य बुलकोदके
न ब्रह्मार्पणाख्येन तत्तात्स्वात्मार्पणं हृत्स्थाय कुर्यादित्यर्थः ५३ अथ समर्प्य प्रतिपत्त्यंतरमाह अथवा
संकुचितधियामयं विधिर्मूर्त्तिपंजरशारदः पंचषष्टादशालिपिन्यासार्णपदांगैश्च वेणुष्टुप्वैः प्रोक्तः ५४
अथवा संकुचितधियां मंदमतीनां अयं विधिः पूजाप्रकारः मूर्त्तिपंजरादिरुक्तः षडष्टादशार्द्ध
रमंत्रेण पूजानंदाकवचश्रवीत्याद्युक्तललाटादिस्थानेषु स्वार्णपदांगैर्मंत्रात्तरन्यासपदपंचकन्यासैः
अंगपंचकन्यासैर्वेणुवनमालादिभिः सुप्रोक्ताः ५४ अथ जपविधिमाह सुप्रसन्नमथ नंदनंदनं
भावयन् जपतु मंत्रमनन्यः स्वार्थसंस्मृतियथाविधिसंख्यापूरणैः स्वयमतैनेविदधीत ५५ अथ सुप्रसन्ना
र्थसंस्मृतिमंत्रार्थस्मरणपूर्वकं अनन्यएकाग्रः सन् मूलमंत्रं जपतु सुप्रसन्नं स्वात्माभिन्नं नंदनंदनं

भावयेत् यथाविधिसंख्यापूरणे यथोक्तजपसंख्यापूरणे सति श्वसंयमनं प्राणायामं विदधीत ज
पारंभेपि प्राणायामो बोध्यः अत्र केचित् वाह्यपूजनासामर्थ्ये अंतरपूजानंतरमेव जपः कार्यः शक्तौ
तु बाह्यपूजानंतरमित्याहुः ५५ प्रयोगपूर्वं कर्तव्यमाह प्रणववपुटितं बीजं जप्त्वा शतं सहिताष्टकं
निजगुरुमुखादाम्नाययोगात्प्रवृत्तमहामतिः सदमृतविदानंदात्माथो जपं च समापयेदिति जपवि
धिः सम्यक्प्रोक्तो मनुहितपाश्रितः ५६ बीजं कामबीजं प्रणववपुटितं सहिताष्टकं शतं अष्टोत्तरशतं
जप्त्वा निजगुरुमुखात् आम्नाययोगात् आत्मपरदेवतासमावेशलक्षणात् ध्यानादीन् महामतिः प्रवृ
त्तकर्मा सदिति अथो सदमृतचिदानंदात्मा सन् जपं च समापयेत् प्रकारमुपसंहरति इति
जपविधिरिति इत्यनेनप्रकारेण मनुहितपाश्रित दशाक्षराष्टादशाक्षराश्रितः पूजाप्रकारः सम्यक्
प्रोक्तः ५६ प्रकृतभजनफलमाह य इमं भजने विधिं नरो भविता सौदयितः शरीरिणां अपि वाक्
कमलैकमंदिरं परमं ते समुपैति तन्महः ५७ यो नर इमं पूजाविधिं भजते असौ शरीरिणां देहिनां
दयितो भविता तथा वाक्कमलयोः सरस्वतीलक्ष्म्योः एकमंदिरं स्थानं भविता अंते देहावसानेप
रं तत्स्य श्रीकृष्णस्य महत्तेजः समुपैति प्राप्नोति ५७ इति श्रीमज्ञानदेवविरचितायां क्रमदीपिका ३९

39

टीकायांतृतीयः पटलः समाप्तः अथ मंत्रजपप्रवृत्तिमुख्यचेतोगमतादीक्षाप्रतिज्ञानीते कथ्यतेस
पदि मंत्रवर्णयोः साधने सकलसिद्धिसाधनं पृष्टिचापमनयोर्महीयसीसिद्धिमीयुरिहनारदादयः १ सप
दिक्षाप्रते मंत्रवर्णयोः साधने साध्यते फलमनयेतिसाधनं दीक्षा कथ्यते कीदृशं सकलसिद्धिसाधनं तथा
त्रादीक्षितानां तु मंत्रदेवार्चनादिषु नाधिकारोस्त्यतः कुर्यादात्मानं शिवसंस्कृतमित्युक्तं चात्सेव सकलसि
द्धिसाधनं यतदीक्षणं विधायनारदादयो मुनयः महीयसीसिद्धिं इह जगति ईयुः प्रापुः १ अथ दीक्षाप्र
दायकस्य गुरोर्लक्षणमाह विप्रं विध्वस्तकामप्रभृतिरिपुघटं निर्मलांगं वरिष्ठं भक्तिं कृष्णांघ्रिपंकेरुहयुग
लरजोरागिणीमुद्वहंतं वेत्तारं वेदशास्त्रागमविमलपथां संमतं सत्सुदांतं विद्यायः संविवित्सुः प्रवण
तनुमनादेशिकं संश्रयीत २ यः विद्यां मंत्रं संविवित्सुः सः एतादृशं देशिकं संश्रयीत सेवेत कीदृशं वि
प्रं ब्राह्मणं ज्ञानिनं तत्वज्ञियादिं तथा विध्वस्ताकामादिषड्वैरिणां घटा समूहो येन तं तथा निर्मलशरी
रं वरिष्ठं श्रेष्ठं तथा कृष्णस्य श्रीपंकेरुहयुगलरजस्सुरागिणीं सादरां भक्तिं उद्वहंतं तथा वेदशास्त्रा
गमसंबंधिविमलपथां ज्ञातारं तथा सत्सु मध्ये संमतं प्रसिद्धं तथा दांतं जितेंद्रियं कीदृशो विवित्सुः
प्रवणे विनीते तनुमनसी यस्य सः २ अथ गुरुसेवाप्रकारमाह संतोषयेदकुटिलाद्रुतरोंतरात्मा तं

क॰म॰ दी॰ ५॰

स्वैर्धनैश्च वपुषाप्यनुकूलवाण्या अब्दत्रयं कमलनाभधियाति धीरस्तुष्टे गुरावथ विवक्षितविवक्षितमंत्र
दीक्षां ॥ २ ॥ अथानंतरं अनुकूलत्वेन गुरुं पद्मनाभबुध्या वत्सरत्रयं संतोषयेत् कैः स्वैर्धनैः वपुषा वचसा अनु
कूलवाण्या प्रियवचनेन च कीदृशः धीरः पंडितः तथा अकुटिलः अवक्रः आर्द्रः अतिस्निग्धः अंतरा
त्मा मनो यस्य सः अथानंतरं तुष्टे गुरौ मंत्रदीक्षां विवक्षितं अभ्यर्थ्य तेन वक्तव्यमित्युक्तं त्रिवर्षं भवि
प्रस्यब्दमब्दवर्षं भूभृतः विशां नवसु वर्षेषु परीक्षा शास्यते बुधैरिति वचनात् इदं च परिचितशिष्य
विषयं परिचितेन एकाहेन भवेद्विप्रो भवेदब्दद्वयान्नृपः भवेदब्दत्रयाद्वैश्यः शूद्रो वर्षचतुष्टयादिति
बोध्यं ॥ ३ ॥ यद्यपि कलावत्यादयो दीक्षा बह्व्यो विधास्तथाप्यत्र क्रियावती दीक्षैव प्रपंच्यते इत्याह प्रपंचसा
रप्रथिता वदीक्षास्ते समर्प्यंते संप्रति सर्वसिद्ध्यै हन्तेषया संततं तेनापि नोऽपि सिद्धिं न प्रदास्यन्ति मंत्रपूगाः ॥ ४ ॥
संप्रति अत्र ग्रंथे क्रियावती दीक्षा संसमर्प्यते स्मरणमात्रमत्र क्रियते न तु विस्तरतोऽभिधीयत इत्यर्थः
कथंभूता प्रपंचसारे प्रथिता विस्तरेणोक्ता किमर्थमभिधीयते सर्वफलसिद्ध्यै यया दीक्षया विना सर्व
दा जापिनोऽपि पुरुषस्य मंत्रपूगाः सिद्धिं यस्मान्न दास्यन्ति दीक्षालक्षणं तु मंत्रमार्गानुसारेण साक्षात्त्वात्
चेष्टदेवतां गुरुरूपं ज्ञात्वा ये लिप्सं मंत्रदीक्षेति सा व्यज्यते ॥ ४ ॥ अथ गुरुस्थानमंडपद्वेवत्कुंडवास्तुबा ५॰

40

लिमाह अथपुरोविदधीतमध्ये वस्तुलीमधियथाविधिवास्तुबलिं बुधः अचलदोर्मितमथतन्मंडपं मसृणा
वेदिकमारचयेत्ततः ५ अथेत्यनंतरं मध्ये वस्थलीमधिशोधितभूमेरुपरि यथाविधि बुधो वास्तुबलिं दद्या
त् बलिदानादिविधिः शारदातिलके द्रष्टव्यः ततस्तदनंतरं अत्र संस्कृतभूमौ मंडपं आरचयेत् की
दृशं अचलदोर्भितं सप्तहस्तपरिमितं उपाह्यांत्यं च हस्तमितेन वहस्तामितं वेति बोध्यं तथा मसृणा वि
क्कणा वेदियुतं ५ त्रिगुणांतबधजाकुशमालयापरिहितं प्रकृतिध्वजभूषितं मुखविवनक्षपयस्तहतोर
णासितवितानविराजितमुज्वलं ८ पुनः कीदृशं मंडपं कुशमालयापरिवेष्टितं कीदृशया मालयापेतर
क्षणा मसेतबुक्तया यद्वा त्रिगुणीकृतसूत्रयुक्तया कीदृशं मंडपं प्रकृतिध्वजैः अष्टध्वजैः शोभितं तथा मु
खचतुष्के द्वारचतुष्टये पयस्तरुभिः क्षीरवृक्षैः तोरणं बहिर्द्वारं यत्र अश्वत्थोदुंबरप्लक्षन्यग्रोधाः क्षीरवृक्षाः
तथा सितेन वितानेन चंद्रातपेन विराजितं तथा उज्वलं निर्मलं ८ ॥ अथ कुंडविधिमाह वसुत्रिगुणि
तांगुलिप्रमितत्वात ताराधते वसोर्वसुपतेरघोककुभि धिष्ण्यमस्मिन् बुधः करोतु वसुमेखलं वसु
गुणाद्वकोणं प्रतीच्यवास्थितराजावरप्रतिमयोभिसंलावितं ७ अथ मंडपानंतरं अस्मिन् मंडपे बुधः
वसोर्वज्रेधिष्ण्यं कुंडं वसुपतेर्धनपतेः कुबेरस्य ककुभि दिशि कीदृशं वसुगुणाद्वकोणं च वबकोणं

क्र॰ म॰
दी॰
५२

41

मित्यर्थः कतोत्र कीदृशं कुंडं वस्त्रेनाग्रष्टानां त्रिगुणितालिखतुर्विंशतिअंगुलानि नेमितं तत्प्रमाणं खातमग
तेस्य ताराउत्रचेश्मायते विस्तरं तेन चयस्य तत् तथा वस्त्रशग्निस्तत्र व्योकाक्तिस्तो मेखलायत्र तत् त्रिमेखलमि
त्यर्थः अग्रे गार्हपत्यादि तेन देन विसंख्यातादयमर्थो लभ्यते तथा अग्नीचिपश्चिमदिशि अश्वत्थितागजस्तो
ष्टसदृशी द्वादशांगुलायामा योनिस्तया संलालितं भूषितं द्वादशस्वरूपचायोनिः स्याद्वादशांगुलिरिस्त
कचात् ७ अथ राशीमंडलविधिं दर्शयाति ततो मंडपेन व्यगंधाउसिक्ते लिखेन्मंडले सम्यगष्टच्छदाक्रं स
वृत्तत्रयं राशिपीठं द्विवीथी च तद्द्वारशोभोपशोभासयुक्तं ८ ततो मंडपानंतरं मंडपे सम्यक् मंडलं लिखे
त् कीदृशं मंडपे गव्यैः पंचगव्यैः वेसवगंधाष्टजलेश्च सिक्ते प्रोक्षिते कीदृशं मंडलं अष्टपद्मसहिते त
था वृत्तत्रयसहिते तथा राशयो मेषादयः पीठपीठगा त्रच वष्टपंतदेत्रयश्च पादचतुष्टयं वृत्ताद्वे वीथय
श्च चतुर्द्वाराणि शोभाचउपशोभाचअस्त्रं कोणाश्च एतैर्युक्तं मंडलं लिखेदित्यन्वयः अयमर्थः साष्टह
स्तहयमाने नचतुरस्त्रं भूभागं परिस्कृत्य तत्र पूर्वापरायतानि समदशसूत्राणि दक्षिणोत्तरायतानि च
समदशसूत्राणि पातयेत् एवं सति षट्पंचाशदुत्तरं द्विशतं कोष्ठानि भवंति ततत्र कोष्ठविभागः म
ध्ये षोडशाभिपदैर्हत्तत्रयाचितं पद्ममालिखेत् तद्बहिरष्टाधिकचत्वारिंशतां द्वादशराशीपीठं लिखेत् ५२

तद्बहिः षट्त्रिंशता पीठपीठांशानि च विलिखेत् तद्बहिश्च तथा चत्वारिंशता वीथीर्विलिखेत् अत्रेदं बोध्यं
पद्मस्य दलाग्रस्पृष्टहस्ते पीठपंक्तिस्थत्वयोः कोणयोर्मध्ये पूर्वदक्षिणपश्चिमोत्तरेषु चतुष्पदं त्यजेत् अत्रा
न्तरे द्वादशाधिके शतपदे द्वारशोभोपशोभाकोणकानि विलिखेत् तत्रैकस्यां दिशि द्वारे षट्पदं
तत्प्रकारः बाह्यपंक्तिगतमध्यकोष्ठचतुष्टयं तदन्तर्गतपंक्तिगतमध्यकोष्ठद्वयमिति द्वारस्यैकस्मि
न् भागे कोष्ठचतुष्टयेन एका शोभा भवति तत्र बाह्यपंक्तिगतमेकं कोष्ठं तदन्तर्गतपंक्तिगतं कोष्ठत्रय
मिति एवं कोष्ठचतुष्टयेन एका उपशोभा भवति तत्र बाह्यपंक्तिकोष्ठत्रयं तदन्तर्गतपंक्तिगतमेकं को
ष्ठमिति तथा कोष्ठषट्केन कोणकमिति एवमपरस्मिन् भागेऽपि शोभोपशोभाकोणकानि बोध्यानि एवं
दिक्त्रयेऽपीति मिलित्वा द्वादशाधिकं शतं भवति विस्तरस्तु शारदायामवगन्तव्य इति संक्षेपः ८ अथ क
लशस्थापनप्रकारमाह ततो देशिकः स्नातः पूर्वं विधानेन विधायात्मपूजावसाने विधिज्ञः स्वा
माग्रतः शंखमर्घ्यपात्राद्यावमाद्यानि पात्राणि संपूरितानि विधायान्यतः पुष्पगन्धाक्षताद्यं करस्थालेनु
ष्टतत्राऽपि पात्रे ९ प्रदीपावलीदीपिते सर्वमस्मन्नस्तदगोचरे स्थानं वा दद्दीत ९ ततस्तदन्ते तद्वि
धिज्ञः आगमोक्तप्रकारज्ञः देशिको गुरुः स्थान पूर्वं स्नानादिकं विधानेन विधिं आत्मपूजापर्यन्त

क-म
दी
५२

42

विधाय समापय्य स्ववामाग्रे शंखं मुद्रां पात्राचननीयपात्राणि संपूरितानि जलादिस्वस्वद्रव्यैः परिपूर्णानि
विधाय यथोत्तरं स्थापयित्वा अथ तद्दोर्दक्षिणभागे पुष्पादीनि पूजाद्रव्याणि विधाय करक्षालननिमित्तं
पात्रे पुष्पदेशे च निधाय सर्वं मन्त्रसाधनसमुपकरणं स्वदृग्गोचरे स्वचक्षुर्विषये प्रदीपावलीदीपिते आद
र्शितस्थापयेत् वायव्यादीशानपर्यन्तमर्च्यापीठस्योदग्गौरवीपंक्तिरादौ पूज्यान्यत्रांशानां बिकेयः
कराग्रैः पाशं दंतस्तणाभीनीदधानः ९ पीठस्योदक्‌उत्तरभागे वायव्यस्थानात् वायव्यकोणात् ईशको
णपर्यन्तं गौरवीपंक्ति गुरूणां परं परासाद्यैरर्च्या प्रयोगस्तु गुरुभ्यो नमः परमगुरुभ्यो नमः पराप
रगुरुभ्यो नमः इति पूज्यान्यत्रेति अत्यत्र पीठस्य दक्षिणभागे अंबिकेयो गणेशः पूज्यः कीटघाःक
राग्रैः पाशं स्वदंतेस्तणीमंकुशं भयं वदधानः ९ आग्नेय्याधारशक्त्यायसमरूवरणपावध्ययोमध्य
भागे धर्मादीन् वह्निरक्षः पवनशिवगतान् दिक्षु धर्मादिस्तंभमध्ये शेषाजं विवक्षितयशणगणात्म
वर्जं केसराणां मध्ये मध्ये च शक्तीर्नव समभियजेत् पीठमंत्रेण भूयः ॥ अथानंतरं मध्यभागे मंडपे
भागे आधारशक्तिप्रमुखं कर्मत्स्यहस्तांतं नवकं आराध्य वह्निरक्षः पवनशिवकोणगतान् धर्मा ५२
दीन् समभियजेत् दिक्षु पूर्वदक्षिणपश्चिमोत्तरासु अवर्मादीन् समभियजेत् तथा मध्ये शेषनागं

पद्मे बिंबत्रितयं सूर्यसोमवह्निमंडलात्रिगुणगणः सत्वरजस्तमांसि ध्यात्मव्रजः आत्मांतरात्मपर
मात्मानः एतन्मध्ये समभिपूजेदित्यर्थः अथ केसराणां मध्ये मध्ये कर्णिकायां वनवशक्तीर्विमला
द्याः पूर्वादिक्रमेण पूजयेत् ष्टयः पुनरपि पीठमंत्रेण पीठं पूजयेदित्यर्थः ॥ ततः शालीन्मध्ये
कमलममलं स्तंडुलवरान्विन्यसेद्दर्भांस्तदुपरि च कूर्चान् ततपुतान् ३ न्यसेत्स्मादक्षिणान्नेरुप
रिष्ठाद्दशकलायकारादर्णाद्यायजन्त चतुर्गंधादिभिरिमाः १२ ततस्तदनंतरं मध्ये कमलं पद्म
मध्ये द्वादशकपरिमितान् ग्रमलान्शुक्लान्शालीन्तन्तर्याशात्मष्टभागपरिमितान्तंडुलवरान्न्य
सेत्स्थापयेत् तदुपरि तंडुलोपरि कूर्चान् ततपुतान् दर्भान् विन्यसेत् कुशात्रयघटितो ब्रह्मग्रंथिः कूर्
चेइत्युच्यते कुशमुष्टिरेवकूर्चस्तुपरे तदुपरि कूर्चोपरि कृशानोर्दशकलाः यकारादिवर्णाः आद्यः
प्रथमो यासांताः प्रादक्षिण्येन न्यसेत्स्थापयेत् तदनंतरं रमादशकलाः गंधादिभिर्यजन्त पूजये
त् प्रयोगस्तु यं धूम्रार्चिषे नमः रं ऊष्मायै नमः लं ज्वलिन्यै नमः वं ज्वालिन्यै नमः शं विस्फुलिंगिन्यै
नमः षं सुश्रियै नमः सं सुरूपायै नमः हं कपिलायै नमः ळं हव्यवहायै नमः क्षं कव्यवहायै नमः
इति तदुक्तं धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी सुश्रीः सुरूपकपिलाहव्यकव्यवहा

क्र· म·
दी·
५२

43

ति ।३। न्यसेत्कुंभे तत्र त्रिगुणितनलसंतंतुकलितं जपेत्सार्द्रे धूपैः स्वपरिमलितैर्योगकमयैः कभाद्यैः कुंभेऽस्मि
न्नवडुवसितिभिर्वर्णयुगलैस्तथान्यस्याभ्यर्च्यात्तदनु च मणौ द्वादश कलाः ।४। तत्र दशकलामये कूर्चेनतां
प्रणवं जपन्कुंभे न्यसेत्स्थापयेत् कीदृशे ग्रीवायां त्रिगुणितालसंतोयेनेतवः कन्याकर्तितकार्पासस्
त्राणितैः कलितं सूत्रमंत्रेण वेष्टिते तथा योगकमयैः कृष्णागरुप्रधानैर्धूपैः परिमलितं सुधूपितं तदनु
पश्चात् तत्र मणौ सूर्यस्य द्वादश कलाः अस्मिन्कुंभे न्यस्य अभ्यर्च्याः पूजनीयाः कैः कभाद्यैर्वर्णयुगलैः की
दृशैः ठकारडकारौ अवसितौ अवसाने येषां ते वडुवसितैः अयमर्थः अनुलोमविनितककाराद्यैकैक
मत्वैः प्रतिलोमपठितभकाराद्यैकैकाक्षरेण सहितैः द्वादशसु कलासु संयोज्य न्यासादिकं कार्यं कंभ
तपिन्यै नमः खंबं तापिन्यै गं फं धूम्रायै घं पं मरीच्यै ङं नं ज्वालिन्यै चं धं रुच्यै छं दं सुषुम्णायै जं भोग
दायै झं तं विश्वायै ञं णं बोधिन्यै टं ढं धारिण्यै ठं डं क्षमायै नमः इत्येवं मन्त्रैः कुंभे भानोः द्वादश कलाः
संस्थाप्य पूज्या इति विवेकः तत्र क्रमेण तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः सुषुम्णा भोगदा
विश्वा बोधिनी धारिणी क्षमेति ।५। एवं संकल्प्याग्निमाधाररूपं भानुं तत्कुंभरूपं विधितान्यस्येत्तस्मिन्
दन्ताद्यैः समेतं कुर्वन्स्वर्णारत्नवर्षैः प्रदीप्तं ।६। एवं प्रागुक्तप्रकारेणाधाररूपमग्निं संकल्प्य तदनु कुंभे ५२

भानुरूपं विचिन्त्य विधिज्ञः पुरुषः तस्मिन्कुंभे मूलमंत्रेणाभ्यर्चितायैः समेतं कुर्वन्पूर्वोक्तलक्षणं सव-
र्णैरत्नवर्यैः पदीमं घोभिर्न्यसेत् १४ अथ क्वाथितायैः त्वकारादिवर्णैः रकारावसानैः समापूरयेत्तं स्व-
मंत्रत्रिपादावसानं पयोभिर्गव्यैः पंचगव्यैर्जलैः केवलैर्वा १५ अथानंतरं पीठकुंभयोरैक्यं विचिन्त्य
औषधितायैः पलाशवल्कजलैः क्षीरिद्रुमक्वाथजलैर्वा सर्वौषधिजलैर्वा गव्यपयोभिर्वा पंचगव्यैर्वा के-
वलैर्वा जलैः त्वकारादिवर्णैः रकारावसानैर्विलोममातृकाभिः स्वमंत्रत्रिपादावसानं मूलमंत्रं वा रत्न-
पजपांते यथा स्यात्तथा तं कुंभं समापूरयेदित्यर्थः १५ कलशजलेऽस्मिन्वसुयुगसंख्याः स्वरगणपू-
र्वाः न्यसतु तथैवाउडुपकलास्ताः सलिलसुगंधाक्षतसुमनोभिस्तदनुयजेच्च १६ अस्मिन्कलशजले
उडुपकलाः वसुयुगसंख्याः षोडशसंख्याः स्वरगणपूर्वाः अकारादिषोडशस्वरपूर्वाः न्यसेत् तदनु
पश्चात् ताः षोडशकलास्तथैव तेनैव क्रमेण सलिलसुगंधाक्षतसुमनोभिर्यजेत्पूजयेत् अं अमृ-
तायै नमः आं मानदायै इं पूषायै ईं तुष्ट्यै। उं पुष्ट्यै ऊं रत्यै ऋं धृत्यै ॠं शशिन्यै लृं चंद्रिकायै लॄं कां-
त्यै एं ज्योत्स्नायै ऐं श्रियै ओं प्रीत्यै औं अंगदायै अं पूर्णायै अः पूर्णामृतायै नम इति मंत्रेण कुंभज-
ले संस्थाप्य षोडशकलाः पूजयेदिति फलितार्थः तदनु अमृतामानदापूषातुष्टिः पुष्टी रतिर्धृ-

क॰ म॰
टी॰
४४

44

तिः शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा पूर्णा पूर्णामृता चेति षोडशेंदुकलाः स्मृता इति १७
अथ विष्णुगंधाष्टकमाह उशीरकुष्ठकुंकुमांबुलोहसजटामुरैः ससीतमिश्रदीरिते हरेः प्रियाष्ट
गंधकं ७ उशीरमुशीरं कुष्ठं अंबुनलदः लोहः अगरुः जटया सहमुरा च जटामांसी एतैर्हरेः प्रेम
कारि गंधाष्टकमुक्तं कीदृशं ससितं सचंदनं ९ अथ शंखपूरणमाह क्वाथतोयपरिपूरिते दरे सं
विलोमविधिनाष्टगंधके सोमसूर्यशिखिनां कलाः पृथक् सेरकर्म विनियोजयेत् क्रमात् १८ दरे
शंखे विधिना मूलमंत्रेण पूर्वोक्तक्वाथतोयपरिपूरिते गंधाष्टकेन मोमंत्रेण सविलोमं सोमसूर्याग्नी
खीनां कलाः पृथक् पृथक् समावाप्य क्रमात् सेरकर्मशाण प्रतिष्ठां विनियोजयेत् कुर्यादित्यर्थः १८
तद्दा स्वरभवास्तु कादिभिष्टादिभिः पुनः ठकारजाः कलाः पादिभिर्मलिपिजाः बिंदुजा याद्यादिभिः
स्वगणेन नादजाः १५ तद्वत्पूर्वोक्तप्रकारेणाक्षरभवाः अकाराक्षरप्रभवा दश कलाः कादिभिः
ककारादिभिर्दशभिरक्षरैः सहिताः पुनः उकारजाः दश कलाः टकारादिभिरक्षरैः सहिताः तथा
मलिपितामकाराक्षरप्रभवा दश कलाः पकारादिभिर्दशभिरक्षरैः सहिताः तथा बिंदुजाः बिंदुप्र
भवाश्चतस्रः कलाः यादिभिश्चतुरक्षरैः सहिताः तथा नादप्रभवाः षोडश कलाः स्वरगणेन षोडश ४४

भिः सर्वैः सहिताः दरेत्समावाह्य मेरकमर्मविनियोजयेदिति पूर्वेणाचयः कलाः कथ्यंते सृष्टीऋद्धिः
स्मृतिर्मेधा कांतिर्लक्ष्मीर्द्युतिः स्थिरा स्थितिः सिद्धिरकारोत्थाः कलाः कादिगता दश १० जराच पा
लिनी शांतिरैश्वरी रतिकामिके वरदाह्लादिनी प्रीतिर्दीर्घा उकारजाः कलाः १० तीक्ष्णा रौद्रा भ
या निद्रा तंद्रा क्षुत्क्रोधिनी क्रिया उत्कारी चैव मृत्युश्च मकारजाः कलाः १० विंदोरपि वृत्तस्र
स्रः पीता श्वेतारुणासिता ४ निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथैव च इंधिका दीपिका चैव रेचि
का मोचिका परा सूक्ष्मासूक्ष्मामृता ज्ञाना ज्ञानामृता व्याप्यायनी तथा व्यापिनी व्योमरूपा स्यादनंता नादसंभवाः
इति कंसृष्टैन मरत्यादिः प्रयोगकृत्यः ५१ समावाहनांते स्वसंस्थापनात्मा कुहवस्तुत्तत्त्वाभिजप्या
बुधेन समभ्यर्च्यनाम्नाः पृथक् तत्तपाद्याद्यर्घ्येन मूलमंत्रेण कुंभे यथावत् २ समावाहनस्यांते ब्रह्म
सार्द्धश्लोकद्वयेनांगन्यासमाह पुनश्च व्यापके कृत्वा मंत्रवर्णांस्तनौ न्यसेत् मूर्ध्नि भाले भ्रुवोर्म
ध्ये नेत्रयोः कर्णयोर्नसो १९ आनने चिबुके कंठे दोर्मूले हृदि तुंदके नाभौ लिंगे तथाधारे क
टयोर्जान्वोश्च जंघयोः २० गुल्फयोः पादयोर्न्यसेत्सृष्टिरेषा समीरिता मूर्द्ध्नि १ ललाटे २ भ्रुवोर्म
ध्ये ३ नेत्रयोः ४ कर्णयोः ५ नसो ६ आनने ७ चिबुके ८ कंठे ९ दोर्मूले १० हृदि ११ उदरे १२ नाभौ १३ लिं
गे १४ आधारे गुदे १५ कट्योः १६ जान्वोः १७ जंघयोः १८ गुल्फयोः १९ पादयोः २० नेत्रादिषु समस्थानेषु
कमवर्णद्वयाद्यमिति विधाय तत्र सृष्टिन्यासः समीरितः कथित इत्यर्थः अथ स्थितिसंहार
न्यासावाहार्धश्लोकेन स्थितिर्हृदादिकांता संहृतिश्चरणादिक २१ हृदयादिपादांतेषु
दशसु स्थानेषु न्यासं विधाय आननादिस्कंधांतेषु दशसु न्यासः स्थितिन्यास इत्यर्थः चरणा ८८
दिकमारभ्य मूर्द्धांतः संहारः न्यास इत्यर्थः २१ एवं आमंत्रयानंतरं पुनः सृष्टिस्थितिन्यासो का

यीवित्याहविधायैवं पंचकृत्वः स्थितं तं मूर्तिपंजरं सृष्टिस्थितीचविन्यस्य षडंगंन्यासमाचरेत् स्थितं
तंयथ्यासात् एवंन्यासं पंचकृत्वो विधाय अथ ॐ श्रों केशवधातृभ्यां नमः इत्यादि द्वितीयपटलोक्तप्रका
रेण केशवादिमूर्तिपंजरं विन्यस्य तन्मंत्रार्चैः स्वदेहे सृष्टिस्थितीविन्यस्य तन्मंत्रात्तैर्हृदयादि
षडंगन्यासमाचरेत् ऋषिछंदोदेवतानां मूर्द्धास्यहृत्सु न्यासमाचरेदित्यर्थः २२ विंशत्यक्षरमंत्रात्त
रैः षडंगन्यासमाचरेदित्युक्तं तत्रांगन्यासे विंशत्यक्षराणि विभज्य दर्शयति श्लोकार्द्धेन गुणाग्निवे
दकरणकरणाक्षकैर्मनोः गुणैस्त्रिभिः अग्निभिस्त्रिभिः वेदैश्चतुर्भिः करणैरनक्षकरणैश्चतु
र्भिरित्यर्थः पुनः करणैश्चतुर्भिः अक्षिभ्यां द्वाभ्यां एतैरक्षरैस्तैरनुक्रमेण षडंगन्यासमाचरेदिति सं
बंधः प्रयोगस्तु क्लीं श्रीं ज्ञीं हृदयाय १ कृष्णाय शिरसे २ गोविंदाय शिखायै ३ गोपीजनकवचाय ४
वल्लभाय नेत्रत्रयाय ५ स्वाहास्त्राय फट् अथार्द्धश्लोकेन किरीटादिमुद्रारचनं दिग्बंधरचनं वाह
मंगावह्वा किरीटादीदिग्बंधं एवं चरेत् २३ किरीटमुद्रांद्याय प्रदात्य दृबंधादिभूषणानां मुद्राबा
हृद्यास्त्रमंत्रेण एवं तत् द्वितीयपटलोक्तवत् दिग्बंधं दशदिग्बंधं चरेदित्यर्थः किरीटमुद्रालक्षणं तु ज
ह्वाग्राः करयोर्मध्ये कनिष्ठांगुष्ठकाः क्रमात् योजयित्वामिथो पेरेऽथ्यं तस्तर्जन्यनामिको किरीटमुद्रा

क॰ म
दी॰
८८

88

प्रोक्तेयं गोप्या शिवसियोजितेति ॐ नमो नारायणाय दिव्यात्मने किरीटाय १ ॐ नमो नारायणाय वर्णात्म
नेतिलकाय २ ॐ नमो ना॰ सावित्र्यात्मने तिलकाय ३ ॐ नमो ना॰ शब्दादिविषयात्मभ्यां मकरकुंडलाभ्यां ४
ॐ नमो ना॰ ललितादिरागात्मभ्यां कर्णावतंसाभ्यां ५ ॐ नमो ना॰ षड्जादिस्वरात्मने ग्रीवाभरणाय ६ ॐ नमो ना॰
व्याहृत्यात्मने स्कंधभूषणाय ७ ॐ नमो ना॰ पंचतन्मात्रात्मने पदकाय ८ ॐ नमो ना॰ विज्ञेया दिविषयात्म
भ्यां केयूराभ्यां ॐ नमो ना॰ प्राणिमात्मभ्यां हस्तकटकाभ्यः १० ॐ नमो ना॰ कर्मेन्द्रियात्मकेभ्यो ङ्गुलीयकेभ्यः ११
ॐ नमो ना॰ ज्ञानेन्द्रियात्मभ्यां मिश्रुधिभ्यां १२ ॐ नमो ना॰ मनोवेगात्मने चक्राय १३ ॐ नमो॰ अहंकारात्मने
शंखाय १४ ॐ नमो ना॰ बुद्ध्यात्मने गदायै १५ ॐ नमो ना॰ इंद्रियार्थात्मने पद्माय १६ ॐ नमो॰ प्र
णवात्मने शार्ङ्गाय १७ ॐ नमो नारायणाय तत्वात्मने ज्यायै १८ ॐ नमो नारायणाय
नादात्मने बाणाय १९ ॐ नमो नारायणाय त्रिविद्यात्मने खड्गाय २० ॐ नमो नारायणाय प्रा
कृत्यात्मने चर्मणे २१ ॐ नमो नारायणाय शब्दब्रह्मात्मने वेणवे २२ ॐ नमो नारायणाय पंचभूता
त्मने वनमालायै २३ ॐ नमो॰ उदात्तादिस्वरात्मने हाराय २४ ॐ नमो॰ नागादिवाय्वात्मने ब्र ८८
ह्मसूत्राय २५ ॐ न॰ प्रकृत्यात्मने श्रीवत्साय २६ ॐ नमो॰ पुरुषात्मने कौस्तुभाय २७ ॐ न॰ रागादिविषयात्मभ्यः

सधिबंधेभ्यः १८ ॐ नः धर्माज्ञानात्मने कुक्षिबंधाय १९ ॐ नमः प्राणादिवाय्वात्मने नाभिकमलाय २० ॐ नः
हिंसात्मने पीतांबराय २१ ॐ नः गुणात्मने कटिसूत्राय २२ ॐ नः अपवर्गात्मभ्यां जानुजंघाभूषणाभ्यां २३
ॐ नः रागपञ्जरः सामात्मभ्यः कटकोर्मिकनूपुरेभ्यः २४ ॐ नः ऐश्वर्याय पादुके २५ ॐ नः विज्ञानात्मने पुष्पे २६
ॐ नः व्यवसायात्मने गरुडाय नमः २७ इति हरिभूषणन्यासः अथ विष्वादिमुद्राः प्रदर्श्य ॐ नमः सुद
र्शनाय अस्त्राय फडिति मंत्रेणादिग्बंधं कुर्यादित्याह दिग्बंधं पूर्ववद्बध्नीयादिति २८ अथात्मार्चनमाह
एवं ध्यात्वार्चयेद्देहमूर्तिपंजरपूर्वकं अथवात्यर्चयेद्धिंसंस्तदर्थं पंचमच्यते २४ एवं पूर्वोक्तप्रका
रेण ध्यात्वा विस्रं देहमर्चयेत् मूर्तिपंजरपूर्वकं यथा भवत्येवमर्चयेत् ॐ केशवधातृध्यातमो
भाले ॐ नारायणाय नमः भ्यां उदरे ॐ माधवमित्राभ्यां हृदये इत्यादि द्वितीयपटलोक्तवत् अथ
मंत्रविभूतिपंजरन्यासः कार्यः देहमिति पाठे हृस्यात्मकत्वेन ध्यानं स्वदेहं पूजयेदित्यर्थः आत्मार्च
नायां वेणुं विहाय चक्रादि चतुर्दश पंक्तिरीटादींश्चार्चयेत् अन्यत्सर्वं वदेवेति बोध्यं उत्तरार्द्धेन बाह्य
पूजनमाह अथवाह्येति अथात्मपूजानंतरं बाह्ये पीठे विस्रं अर्चयेत् तदर्थं बाह्यपूजार्थं पंचे
पूजाधारपीठमुच्यते तदर्थः २७ गोमयेनोपलिप्ते वीतं च पीठं निधापयेत् लिप्त्वा गंधपंकेन

क्र॰ म
दी॰
८४

लिखेदष्टदलांबुजं २५ आदौ गोमयेनोर्वीं विलिप्य तत्र पीठं पूजाधारपत्रं स्थापयेत् किं कृत्वा गंधपंकेन पीठं
विलिप्य पीठं विलिप्य पीठे अष्टदलकमलं लिखेदित्यर्थः २५ कर्णिकायां तु षट्कोणं ससाध्यं तत्र मन्मथं शि
ष्टैस्तु सप्तदशभिरक्षरैर्वेष्टयेत् स्मरं २६ कर्णिकायां षट्कोणं लिखेदिति पूर्वेणान्वयः तत्र कर्णिकामध्ये स
साध्यं उपलक्षणात् साध्यसाधककर्मभिः सहितं मन्मथं कामबीजं लिखेदित्यर्थः शिष्टैः कृसायेत्यादि
कैः सप्तदशभिरक्षरैः स्मरं कामबीजं वेष्टयेत् २६ आग्नेयानिलकोणेषु श्रियं पृष्ठेषु संविदं षडक्षरं
संधिषु च केसरेषु त्रिशस्त्रिशः २७ विलिखेत् स्मरगायत्रीं मालामंत्रं दलाष्टके षट्शः संलिख्य तद्बाह्ये
वेष्टयेन्मातृकाक्षरैः २८ आग्नेयानिलकोणेषु पूर्वं वह्निवायव्यकोणेषु श्रियं श्रीबीजं लिखेत् पृ
ष्ठेषु ईशान्याग्नेयपश्चिमकोणेषु संविदं ह्रीं लिखेत् संधिषु षट्कोणसंधिषु षडक्षरं ह्रीं कृसायनमः इति
लिखेत् केसरस्थानेषु त्रिशः त्रिशः अक्षराणि त्र्यं कामगायत्रीं लिखेत् दलाष्टके प्रतिदलं षट्शः
वर्णानां षट्कं मालामंत्रं च समाप्ताश्चत्वारिंशदक्षरं संलिख्य तद्बाह्ये अष्टदलस्योपरि वृत्तं कृत्वा मा
तृकावर्णैर्वेष्टयेत् २८ भूबिंबं च लिखेद्बाह्ये श्रीमायेदिग्विदिक्ष्वपि बाह्ये मातृकावेष्टनोपरि भूबिं
बं चतुरस्राष्टकयुक्तं चतुरस्रं विलिखेत् दिक्षु श्रीं विदिक्षु ह्रीं लिखेत् एवं श्लोकार्द्धयंत्रं समासं पूजायं ८४

89

त्रकथनप्रस्तावएवधारणायंत्रस्याप्युक्तत्वात्साध्यादिलिखनमादावस्तत्तच्चन अतएवचपूर्ववद्विलेख
नंवदन्नेवयंत्रधारणायाः फलमाह एतद्यंत्रंहाटकादिपत्रेष्वालिख्यपूर्ववत् २९ साधितंधारयेद्योवै
सोर्च्यतेत्रिदशैरपि योनरहाटकादिपत्रेषुसुवर्णरूप्यताम्रभूर्जपत्रान्यतमेषुपूर्ववदालिख्यसाधितं
संपातजपाभ्यांसंस्कृतमेतद्यंत्रंधारयेत्सः त्रिदशैरपिअर्च्यते साधितंधारयेदित्यनेनपूजायंत्रेसाध्या
दिलिखनाभावकामबीजादिलिखनाभावश्चसूचितः अथकामगायत्रीमुद्धरति स्याद्गायत्रीकाम
देवपुष्पबाणौचङेंतिकौ विद्महेधीमहिपुतौ तन्नोनंगःप्रचोदयात् यथाजपादौगोपालमंत्रा
णांजनरंजनी ३१ कामदेवपुष्पबाणौङेंतिकौचतुर्थ्यंतौयुक्तौ यथासंख्यंविद्महेधीमहिपदाभ्यांयु
क्तौतथातन्नोनंगःप्रचोदयात् कामदेवायविद्महेपुष्पबाणायधीमधीमहि तन्नोनंगःप्रचोदया
दित्येषाकामगायत्रीगोपालमंत्राणांजपादौस्यात् कीदृशीगायत्रीजनरंजनी अनेनास्याःस्वातंत्र्य
मप्युक्तंभवति कामगायत्र्यानारदऋषिः गायत्रीछंदः कामोदेवता ३१ कामदेवस्यमालामंत्रमु
द्धरति नत्यंतेकामदेवायङेंतेसर्वजनप्रियं उक्त्वासर्वजनांतेनसंमोहनपदंतथा ३२ ज्वलज्वल
प्रज्वलेतिप्रोक्त्वासर्वजनस्यच हृदयंममवशंकुरुकुरुस्वाहारत्यर्थः अस्याष्टचत्वारिंशदक्षराम

क॰म॰
टी॰
५॰

मंत्रस्यनारदऋषिः जगतीछंदः कामोदेवता १२ नमः कामदेवायहृदयाय॰ सर्वजनप्रियाय॰ शिरसेस्वाहा
सर्वजनसंमोहनायशिखायैवषट् ज्वलज्वलप्रज्वलकवचायहुं सर्वजनस्यहृदयंममनेत्रत्रयायवौष
ट् वशीकुरुस्वाहा इतिषडंगन्यासः १।२।४।२।१।८ अस्यमदनमंत्रस्याद्यासक्लीङ्गगतः कस्माध्येयः
मालामंत्रमुपसंहरन्नेवफलमाह प्रोक्तोमदनमंत्रोष्टचत्वारिंशद्भिरक्षरैः जपादौमारबीजाढ्योजग
त्त्रयवशीकरः १४ अष्टचत्वारिंशदक्षरैरयंमदनमंत्रः प्रोक्तः कीदृशः जपादौ क्लींबीजाढ्यः ज
गत्त्रयवशीकरः १४ अस्यापिपूजापीठे सर्वशक्तीयपदलपूजयेदित्याह अष्टहेचनरक्तस्मादष्ट
वस्त्रविभूषिते पीठेपूर्ववदभ्यर्च्यमूर्तिसंकल्पपौरुषीं १५ तत्रवाह्याच्युतंभक्त्यासकलीकृत्यपूजये
त् आसनादिविभूषांतेपुनर्न्यासक्रमाद्यजेत् १६ अष्टवस्त्रविभूषितेचनरक्तेभ्रष्टहेपूर्ववदष्टद
लाद्युपेतेअस्यपीठेअभ्यर्च्यपुरुषस्यकामदेवस्यरूपंपौरुषीनाममूर्तिंमनसिसंकल्पकराभ्यांपुष्पां
जलिमादायपद्मवहन्नासापुटेनहृदयाद्देवतेजःपुष्पांजलावानीयकामदेवइहागच्छइहागच्छेति
मंत्रेणतत्रपीठेभक्त्याच्युतमावाह्यइहसंनिधेहि२ इहसंनिरुध्यस्व२ इतिपुष्पांजलिंकृत्वाअथसक
लीकृत्यमंत्राक्षरैः षडंगन्यासमृष्यादिसंहारन्यासेलेजोहृपंहृदिंस्पर्शीरंकृत्वापुनरनंतरंन्यासक्रमं ५॰

१०

सृष्टिस्थितिन्यासस्थानेऽश्रासनादिविभूषणांतं यथास्थानन्यायतेनु पूजयेदित्यर्थः ३६ एतदेव वि
शदयति सृष्टिस्थितीषडंगं च किरीटकुंडलद्वयं शंखचक्रगदापद्ममालाः श्रीवत्सकौस्तुभौ ३७
गंधाक्षतप्रसूनैश्च मूलेनाभ्यर्च्य पूजयेत् आदौ वह्निपुरद्वंद्वकोणेष्वंगानि पूजयेत् ३८ सृष्टिस्थि
तिन्यासस्थानाभिषडंगन्यासस्थानानि किरीटादिकेत्वगंधाक्षतप्रसूनैर्मूलेनाभ्यर्च्यादौ वह्निपुरद्वं
द्वकोणेषु षट्कोणेषु षट्कोणेषु अग्न्यादि आग्नेयकोणमारभ्य षडंगन्यासस्थानानि किरीटादिकं च गं
धाक्षतप्रसूनैर्मूलेनाभ्यर्च्यादौ वह्निपुरद्वंद्वकोणेषु षट्कोणेषु अग्न्यादि आग्नेयकोणमारभ्य षडंगा
नि पूजयेदित्यर्थः ३९ अग्न्यादिदलपूज्यान्यंगानि दर्शयत्यर्द्धश्लोकेन सहृच्छिरः शिखावर्मनेत्रमस्त्र
मिति क्रमात् आग्नेयनैरृत्यवायव्येशानीषु हृदयशिरः शिखाकवचानि अग्रभागे नेत्रं पृष्ठे वा दिदि
क्षु वास्त्रमिति क्रमादंगानि पूजयेदित्यर्थः॥ अथ द्वितीयावरणमाह वासुदेवसंकर्षणः प्रद्युम्न
श्चानिरुद्धकः ४० अग्न्यादिदलमूलेषु शांतिः श्रीश्च सरस्वती रतिश्च दिग्दलेषु ध्यालतो ऽप महिषीर्य
जेत् ४१ हाक्लिण्यायादक्षसव्यक्रमात्पत्राग्रे केशवच ततः षोडशसाहस्त्रं स्वजदेवार्चयेत्स्त्रियाः ४
अष्टदलस्याग्न्यादिदलमूलेषु अग्निनैरृत्यवायव्येशानेषु वासुदेवादयश्चत्वारः पूज्याः॥ दिग्दले

कृ॰ म
दी॰
८१

षुपूर्ववद्दक्षिणपश्चिमोत्तरदलेषु शांत्यादयश्च तस्याः पूज्या इत्यर्थः तृतीयावरणमाह ततोऽष्टेति ततोऽनंत
रं हारुक्मिण्याद्या अष्टमहिषीर्दलस्थक्रमात्तत्राग्रकेसरगाः दक्षिणे रुक्मिण्याद्या अष्टमहिषीर्दलस्थक्रमा
त्तत्राग्रकेसरगाः दक्षिणे रुक्मिणी सव्ये सत्यभामा दक्षिणे नाग्निजिती सव्ये सुनंदा दक्षिणे मित्रविंद वामे सु
लक्ष्मणा दक्षिणे जांबवती वामे सुशीलेत्यर्थः चतुर्थावरणमाह ततः षोडशेति ततः षोडशसाहस्रं स्त्रि
याः सकृदेवपकप्रयोगेनैव परितः पूजयेदित्यर्थः ४ अथ पंचमावरणमाह इंद्रनीलमुकुंदाद्यान्मक
रानंदकच्छपान् शंखपद्मादिकौ चापि निधीनष्टौ क्रमाद्यजेत् ४१ इंद्राद्येष्टौ निधीन् पूर्वादिदिक्षु क्रमा
द्यजेत् इंद्रं १ नीलं २ मुकुंदं ३ मकरं ४ आनंदं ५ कच्छपं ६ शंखनिधिं ७ पद्मनिधिं ८ चेत्यर्थः ४१ षष्ठं सप्तमं
चावरणमाहार्धेन तद्बहिश्चेंद्रवज्राद्याश्चाहतीस्तु प्रपूजयेत् तद्बहिरिंद्राद्या देवा वज्राद्या हेतय एते द्व्याहृ
तीश्चावरणे संप्रपूजयेदित्यर्थः आवृत्तिसमकमुपसंहरन्नेवाग्रेतनेनेतिकर्तव्यतामाह इति सम्यगाहृत्तिहृतम
भ्यर्च्याहृतमादरात् ४२ प्रीणयेद्दधिखंडाज्यसंमिश्रेण पयोधसा राजोपचारान्दत्वा तत्तन्नानगाचकेणावं ४२ उद्वासये
त्स्वहृदये परिवारगणैः सह न्यस्यात्मानं समभ्यर्च्य तन्मयः प्रजपेन्मनुं ४४ इति संक्षेपत्त समावरणयुक्तमच्युतमाद
रात् अभ्यर्च्य दधिकादिखंडाज्यमिश्रेण पयोधसा पायसान्नेन तथा राजोपचारान्गंधपुष्पादीन्तामस्तान्दत्वा केणावेत्त ८१

तानुत्वा च स्वहृदये स्थापयेत् कैः सह परिवारगणैः सह न्यस्त्वा षडंगन्यासं कृत्वा आत्मानं पंचोपचारैः स
मभ्यर्च्य तन्मयः कृसोऽहमिति भावयन् मंत्रं प्रकृतं प्रजपेदित्यर्थः ४४ प्रासंगिकं परिसमाप्य प्रकृतमु
पसंहरत्यर्धेन ॥ रत्नाभिषेकध्याने त्वा विंशत्यर्णाश्रिते रिते ॥ रत्नाभिषेकस्य ध्याने च रत्नापूजाव
रिता प्रोक्ता कीदृशी विंशत्यक्षरमंत्राश्रिता तथा च यस्यां पूजायां कुलस्य रत्नाभिषेकध्यानेन तु विं
शत्यक्षरोक्ता पूजा कार्येति सूचिते विंशत्यक्षरजपादेः फलमाह जपहोमार्चनध्यानैर्योऽमुं प्रभजते
मन्त्रे ४५ तद्देवमर्पितै रत्नैः स्वर्णधान्यैरनारतं पृथ्वी पृथ्वीकैरतस्य सर्वपास्य कुलाकुला ४६ पु
त्रैर्मित्रैः संसम्पन्नः प्रयाते नेप तां गतिं यः पुमान् जपादिभिरमुं प्रभजते देवं रत्नादिभिरनारतं
नितं तर्पयेत पृथु न रा सर्वधान्यसमृद्ध्या प्रा पृथ्वी तस्य कराधीना भवति पुत्रैर्मित्रैः संसम्पन्नो भ
वति अंते देहांते च परां गतिं याति प्रयोगमाह वस्त्रावभ्यर्च्य गोविंदं शुक्लपुष्पैः सतंडुलैः ४७ आ
ज्याक्तैरद्भुतैर्हुत्वा भस्म तत्स्त्री धारयेत् तस्मात्त्राद्विसमृद्धिः स्यात् तत्र सर्वपोषितः ४८ वस्त्रे गोविं
दमभ्यर्च्य आज्याक्तैः सतंडुलैः शुक्लपुष्पैः प्रहुतं कृत्वा तद्भस्म योषा बिभृयात् तस्याः पुत्रादिसमृद्धिः
स्यात् सर्वैर्योषितश्च तत्र भाग्य रत्यर्थः ४९ प्रयोगांतरमाह आज्यैर्लक्षं हुनेदक्तपद्मैर्वा मधुराप्लु

क॰ म
दी
९२
92

नैः श्रियानसैंद्रमैश्वर्यंतरणलेशायतेध्रुवं ५० यः आज्यैरथवा मधुराक्तैर्हुतेन मधुशर्कराघृतैः रक्तपद्मैर्ले
तैरुक्तेन स श्रियाः समृद्ध्या ऐंद्रमैश्वर्यं ध्रुवं निश्चयेन तरणलेशात् स्यं भवतीत्यर्थः ५१ प्रयोगांतरमाह
शुक्लादिवस्त्रलाभाय शुक्लादिकुसुमैर्हुनेत् त्रिमधाक्तैर्दशाशतमाज्यावैर्वा एतत्संयुते ५२ शुक्लव
स्त्रलाभाय शुक्लपुष्पैस्तत्तद्वर्णवस्त्रलाभाय तत्तद्वर्णपुष्पैर्हुतेन मधुशर्कराक्तैरथवाज्यताक्तैः रष्टो
त्तरसहस्रं हुतेनेत्यर्थः ५३ प्रयोगांतरमाह सौदासिकैः सितैः पुष्पैरष्टोत्तरसहस्रकं हुते त्रिसंध्यसव
र्णमासान्तु राधान्नृपतेर्भवेत् ५४ यः सौदर्यं मधुनासिक्तैः सितैः पुष्पैर्नित्यमष्टोत्तरसहस्रकं षण्मा
सपर्यंतं हुनेत् सः नृपतेः पुरोहितो भवेत् ५५ दशाष्टादशवर्णात्मकजपध्यानेहुतादिकं विदध्यात्क
मवानेनताभ्यामत्र प्रकीर्तितं ५६ दशाक्षराष्टादशाक्षराक्ते जपादिकं कमंत्रेनेन विंशत्यर्णेन वा वि
दध्यात् तथात्र विंशत्यर्णे प्रकीर्तितं जपादिकं ताभ्यां दशाष्टादशाक्षराभ्यां वा विदध्यादित्यर्थः ५७
मंत्रांतरमुद्धरति श्रीशक्तिस्मरकृष्णाय गोविंदाय पश्चिरोमनुः रव्यर्णो ब्रह्मगायत्री कृष्णस्याद्दिग्णास्य
नं ५८ श्रींह्रींक्लींकृष्णाय गोविंदाय स्वाहेति रव्यर्णो वा दशाक्षरो मंत्रः अस्य ब्रह्मा ऋषिः गायत्री छंदः
कृष्णो देवता इत्यर्थः ५९ अंगन्यासमाह आर्थेन बीजेस्त्रिवेदषड्भार्णैरंगषट्कमुदाहृतं श्रीं हृदयाय ९२

क्लीं शिरसे ह्लीं शिखायै ह्स्नाय कवचाय ॐ गौंविंदायनेत्रत्रयाय वौषट् स्वाहास्त्राय फट् इत्यर्थः
फलं सक्षायनमाह विप्रपर्णीदितजपध्यानहोमार्चनक्रियः ५२ मंत्रोयं सकलैश्वर्यकांक्षिभिः से
व्यतांबुधैः सकलैश्वर्यकांक्षिभिर्बुधैरयं द्वादशाक्षरो मंत्रः सेव्यतां कीदृशोयं विंशत्यक्षरमंत्रोक्त
जपादिमान् षोडशाक्षरं द्वादशाक्षरं चाह श्रीशक्तिकामएवीगजन्मशक्तिरमांतिकः ५८ दशाक्षरः
सएवादौ स्वादौ शक्तिरमायुतः मंत्रो विकृतिरव्यर्णो वाचक्रायेतिनाविमौ ५९ श्रीशक्तिकामबीजा
दिः कामशक्तिश्री बीजानि स्रंते यस्य एताट्यो दशाक्षर इत्येकाषोडशाक्षरो मंत्रः द्वादशाक्षरमा
ह सएवेति सदशाक्षरएवादौ पठनीयः कीदृशः स्वादौ स्वाहेत्यस्यादौ क्लीं श्रीबीजाभ्यां युक्तः सन् द्वा
दशाक्षरः अथवा सएव दशाक्षरएवादौ शक्तियुक्तः स्वाहादौ वरमायुत इत्यर्थः श्रीं क्लीं ह्रीं गोपीजन
वल्लभाय स्वाहा ह्लीं क्लीं श्रीं इति षोडशाक्षरः द्वादशाक्षराविमौ मंत्रौ श्राचक्रावि चक्रस्वचक्राय गायुक्तौ ज्ञेया
वित्यर्थः ५९ इज्याविधिमतिदिशन्नेव मंत्रयोर्ध्यानमाह विंशत्यर्णोक्तपूजनविधी ध्यायेद्दशभुजं
वरदाभयहस्ताभ्यां श्लिष्यंतं स्वांकगेप्रिये ६० पद्मोत्पलकरेताभ्यां श्लिष्टं चक्रदरोज्वलं दशलक्षंज
पेदाज्यैस्त्रावसाहस्रहोमतः ६१ सिद्धाविमौ मनूसर्वसंपत्तौ भारणदौन्तृणां कीदृशौ इमौ मंत्रौ विंशत्य

तदुक्तः पूजाविधिर्ययोस्तौ अथध्यानानंतरं अच्युतं ध्यायेत् कीदृशं वरदाभययुक्तौ वनौ हस्तौ च ता-
भ्यां दक्षवामसोत्संगास्थिते प्रिये हरिकिण्णी सत्यभामे आश्लिष्यन्ते किंविशिष्टे पद्मोत्पलहस्ते कीदृशं अच्यु-
तं ताभ्यां प्रियाभ्यां श्लिष्टं आलिंगितं पुनः कीदृशं चक्रोदरः शंखवस्त्राभ्यां उज्ज्वलं सुंदरं ध्यात्वा मंत्रं दशलक्षं
जपेत् दशांशहस्रमानेन आज्यै होमः ततः इमौ मंत्रौ सिद्धौ स्यातां कीदृशौ मंत्रौ त्रयाणां सर्वसंपत्सौभाग्य-
प्रदौ अथ दशाक्षरमंत्रस्य त्रीन् भेदानाह मारशक्तिमाः एवं शक्तिश्रीमारपूर्वकः ८१ श्रीशक्तिमार
पूर्वश्च दशार्णमनवस्त्रयः एतेषां मनुवर्णानां मंत्रार्ष्यादि दशार्णवत् ८२ क्लींह्रींश्रीपूर्वको दशार्ण
एकः ह्रींश्रीक्लींपूर्वको द्वितीयः श्रीह्रींक्लींपूर्वकस्तृतीय इति त्रयो दशाक्षरास्त्रय इत्यर्थः अस्याश्च
क्लींदीनं गाति नारदोमुनिः पंक्तिश्छंदः गोपीनाथो देवतेत्यर्थः ८२ त्रयाणां विभागेन ध्यानमाह पं-
चचक्रधनुर्बाणपाशांकुशधरोऽरुणः वेणुं धमन् एतं दोर्भ्यां ध्येयः हंसो दिवाकरे ८३ आद्ये
मनौ ध्यानमेव द्वितीये विशदार्णवत् दशार्णवत् तृतीये गदिकालाद्यैः समर्चना ८४ अथ मनो
क्लींह्रींश्रीबीजयुक्ते मंत्रे सूर्यमंडले हंसो ध्येयः कीदृशः उपरितनदोर्भ्यां एतं वेणुं धमन्नुवादय-
न् तदधःस्थितषड्भुजैः क्रमात् चक्रादिधरः अरुणः आरक्तः इदमेव विशदयति आद्य इति ५३

एवमुक्तं ध्यानमाद्ये मंत्रे कर्त्तव्यं द्वितीये क्रीं श्रीं ह्रीं पूर्वं विंशदर्णावज्राभिषेक ध्यानं कार्यं श्रीं क्रीं ह्रीं ए
वं केवलं तृतीये दशार्णवत् ध्यानं कार्यं आवरणपूजामाह अंगेति अंगैर्दिक्पालैस्तदस्त्राद्यैरावरणानाम
र्चना कार्या ९४ पुरश्चरणमाह पंचलक्षं जपेन्मासद्युतं पायसैर्हुनेत् ततः सिद्धं तिमत
वोक्तं मंत्रिकांतिदाः ९४ पंचगुणं लक्षं जपेत् पंचगुणितमयुतं पायसैर्हुनेत् ततएतत्रयोम
नवः सिद्धेति कीदृशा मंत्राः आराधकनृणां धनकांतिदाः ९४ अथमंत्रांतरमाह अष्टादशार्णो मा
र्तंडो मन्त्रस्तनधनप्रदः अस्याष्टादशार्णो हरो मंत्रः सुतधनप्रदः अष्टादशानुरोक्तं ऋषिच्छंदो देव
ते ह्रेयं साधानृष्यादि [illegible] ऐं क्लीं मारानृषदवैः क्रमात् अंगन्यासमतो रंगादिक्पालाद्यैः स
मर्चना ९५ मार्तंडः क्लीं बीजांतः अष्टादशा +२ जदीर्घयुक्तैः कामबीजैरस्य मंत्रस्य अंगन्यासः
कार्यः अंगदिक्पालाद्यैरावरणैः समर्चना पूजा कार्येत्यर्थः ९५ अस्य ध्यानमाह पाणौ पायसपक्व
माहितरसं बिभ्रन्मुदा दक्षिणे सव्ये पारदचंद्रमंडलमति भ्रद्वेणुं गवां नंदयन् कंठे कालितपुंडरीक
नवमस्रदामदीप्तिं वहन् देवो दिव्यदिगंबरो हि सान्तवः सौख्यप्रदो दाविष्णुः ९६ यशोदाबाल
को देवो वः सौख्यं दिशतदरात् कीदृशः दक्षिणे पाणौ पायसपक्वं पायसं च तत्पक्वं चेति कर्मधार

यः स्वपक्वपायसमिति विशेषणाविशेष्ययोः कामचारान्यायसंतिशेषणांतस्य पूर्वनिपातश्छंदोनरोधा
त् सद्यपाणेशारत्कालीनचंद्रमंडलनिभं अतुज्वलं हैयंगवीनेननवनीतेनदद्यात् कंठेकल्पितः कंठभूषा
येनसंबद्धः पुंडरीकस्यव्याघ्रस्ययोनावस्तंवहन् कीदृशेनवृक्षस्त्रदामाअत्युद्दाकांहिर्यस्यतं कीदृशो दे
वः दिव्यश्चासौदिगंबरश्च ९६ अस्यपुरश्चरणविधिमाह दिनशोऽभ्यर्च्यगोविंदं द्वाविंशल्लक्षमानतः जपादं
शांशं जुहुयात्सिताज्येनपयोधसा ९७ दिनशः प्रत्यहंगोविंदकेश्चनदिनैर्द्वात्रिंशल्लक्षमानतो जपात्तदंशांशं
सिताज्येनशर्कराहृतघृतेनपयोधसापायसान्नेनजुहुयात् ९७ तर्पणविधिमाह पूज्यस्यदेवमयच्युत
पियेत्तन्मखांबुजे क्षीरेणकदलीपक्वैर्दध्नाहैयंगवेनच ९८ जलारावष्टदलंपद्मं विलिख्यतत्रपीठस्थंजा
कृत्वादेवमावाह्यअभ्यर्च्यक्षीरादिचतुष्टयधुर्ध्याध्यानेनलेनस्यदेवस्यमुखांबुजेतर्पयेत् कदल्यामेवस्व
तः पक्वानि कदलीपक्वानितैः फलैरितिशेषः ९८ अस्यफलमाह स्वनार्थीतर्पयेदेवं वत्सराल्लभतेस्व
नं यद्यदिच्छतितत्सर्वंतर्पणादेवसिध्यति ९९ यः स्वनार्थीपवंवत्सरपर्यंतेतर्पयेत्स वृत्सरान्तस्वनंलभते
अन्यदपिधनादियद्यदिच्छतितत्सर्वंतर्पणादेवजपादिभिरपेक्षाद्ववतीत्यर्थः ९९ मंत्रातरमुद्धरति वा १५
रमेवंमारवीजंचकृस्नायभवनेश्वरी गोविंदापरमागोपीजनवल्लभङे॰प्रिरः चतुर्दशाक्षरोपातःअक्रः

सर्गीनहृद्यगाः द्वाविंशत्यक्षरो मंत्रो वागीशत्वप्रदायकः ११ ऐं क्लीं कृष्णाय ह्रीं गोविंदाय श्रीं गोपीजनव
ल्लभाय शिरः चतुर्दशाक्षरोपेतः प्रोक्तः सर्गीतननहृद्यगाः द्वाविंशत्यक्षरो मंत्रो वागीशत्वप्रदायकः यस्ता
ह्लालो इति मंत्रः शिरः स्वाहान्तः हृद्धगतस्य स्वाहाशाहृस्य उद्यगाः प्रोक्तः सकारश्च तुर्दशाक्षरश्रोकारस्ते
न युक्तः सर्गी विसर्गी येन इत्यर्थः अयं द्वाविंशत्यक्षरो मंत्रो वागीशत्वस्य बृहस्पतित्वस्य प्रकर्षण
साधकः ११ अर्घ्यादिकमतिदिशति अष्टादशार्णवत्सर्वमंगर्घ्यादिकमस्यतु पूजानुविंशत्यर्णोक्तास
ति पतिस्त कथ्यते १२ नारद ऋषिः गायत्री छन्दः गोपालो देवता पंचभिः पंचभिर्ष्ठभिः चतुर्भिः द्वाभ्या
मेवेन षडंगन्यासः विंशत्यक्षरोक्ता पूजा कार्य प्रतिपत्तिर्ध्यानेन कथ्यते १२ वामोर्ध्व हस्ते दधतं विद्यास
र्वस्वपुस्तकं अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीं १३ शब्दब्रह्ममयं वेणुमधः पाणिद्वये रितं
गायंतं पीतवसनं श्यामलं कोमलच्छविं १४ बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः उपासितं मुनिग
णैरुपातिष्ठेद्धरिं सदा १५ ऊर्ध्वं वामहस्ते विद्येकरूपं सर्वस्वं पुस्तकं दधतं दक्षिणोर्ध्वे हस्ते स्फाटि
कीं मातृकामयीं अक्षमालां दधतं अधःस्तनपाणिद्वयेन दीरितं वादितं शब्दब्रह्ममयं वेणुं दधतं वे
णुनाव गायंतं पीतां वरं श्यामलं स्निग्धकांतिं बर्हिबर्हैर्मयूरपिच्छैः सेन कृतउत्तंसः शिरोभूषणं येनतं

क्र॰म
दी॰
९५

सर्वविदं सर्ववेदिभिर्मुनिगणैः सनकादिभिरुपासितं हरिं सदा उपतिष्ठे ध्यायेदित्यर्थः ॥१५ अथ पुर
श्चरणमाह ध्यात्वेवं प्रमदावेषविलासं भुवनेश्वरं चतुर्लक्षं जपेन्मंत्रं ममममं मंत्री संयतः ॥१६ प्रम
दायाः स्त्रिया रवः वेषो विलासश्चेष्टा विशेषश्च यस्मिन् तं भुवनेश्वरं एवं ध्यात्वा अमुं मंत्रं चतुर्गुणलक्षं ज
पेत् कीदृशो मंत्री संयतः पौरश्चरणिकसकलनियमोपेत इत्यर्थः ॥१७ होममाह पलाशपुष्पैः
स्वादुक्तैश्चत्वारिंशत्सहस्रकं जुहुयात्कर्मणानेन मंत्रः सिद्धो भवेद्ध्रुवं ॥ स्वादुक्तैर्हेतमधुघृतार्कनामि
श्रितैः पलाशपुष्पैश्चत्वारिंशत्सहस्रकं जुहुयात् अनेन पुरश्चरणकर्मणा ध्रुवं निश्चितं मंत्रः सि
द्धो भवेत् ॥ अस्य फलमाह योस्मिन्निशातधीर्मंत्री वर्त्ततेन वक्त्रगृहदशात् गद्यपद्यमयी वाणी तस्य गं
गाप्रवाहवत् ॥१८ सर्ववेदेषु शास्त्रेषु संगीतेषु च पंडितः सर्वविन्निं परमां लब्ध्वा चांते स्यायात्यरं पदं ॥१९
यो मंत्री अस्मिन्मंत्रे तिसानानिमेला धीर्पस्थैर्ट शोभवति तस्य चक्रगकरालमुखमध्यात् गद्यपद्यम
यी दिव्यप्राकृतसूरसेनमागधापभ्रंशपैशाचीलक्षणा वाणी वर्त्तते प्रवर्त्तते सच सर्ववेदेषु शास्त्रे
षु संगीतेषु गीतवाद्येषु च पंडितः प्रवीणः स्यात् गीतं वाद्यं नृत्तं संगीतमितिहलायुधः सच इह लोके
परमां उत्कृष्टां संविन्निं सर्वमान्यतां लब्ध्वा चांते परं पदं यायात् प्राप्नुयात् ॥१९ मंत्रांतरमुद्धरति तारं ९५

95

ॐ भगवान् ङेंतो नंदपुत्रपदं तथा नंदांते वपुषोच्यग्निमायांतो दशवर्णकः ८ अष्टाविंशत्यक्षरोयं
ब्रुवे द्वात्रिंशदक्षरं तारं प्रणव ॐ ब्रह्मणे नमः भगवान् ङेंतो भगवते इत्यर्थः तथा नंदपुत्रपदं ङें नमि
त्यर्थः आनंदवपुषे इति च्छेदः अग्निः षकारः माया ईकारः अग्नि रेफः तेन श्रीमिति बीजं तेन दशवर्णो
दशाक्षरः ॐ नमो भगवते नंदपुत्राय आनंदवपुषे श्रीगोपीजनवल्लभाय स्वाहा इत्यष्टाविंशत्यक्षरोयं क
थित इत्यर्थः अथ द्वात्रिंशदक्षरं वक्ति प्रतिजानी ब्रुवे द्वात्रिंशदक्षरमिति नंदपुत्रपदं ङें तं श्यामलां
गपदं तथा ८ तथा बालवपुः कृष्णः गोविंदो दशवर्णकः अनयोर्नारद ऋषिश्छंदस्त्रिष्टुभगव
ष्टुभौ ८२ नंदपुत्राय श्यामलांगाय बालवपुषे कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा इत्यर्थः
अनयोरष्टाविंशदक्षरद्वात्रिंशदक्षरयोर्यथाक्रमं उस्मिगनुष्टुभौ छंदसी ८२ आचक्राद्यैरंगमंग
दिक्पालाद्यैश्च पूजनं दशाक्षरोक्तैराचक्राद्यैरंगपंचांगन्यासः कार्य इत्यर्थः आवरणपूजामाह
अंगेति अंगावरणं इंद्राद्यावरणं वज्राद्यावरणमित्यावरणत्रयेण पूजनमित्यर्थः मंत्रद्वय
स्यापेक्षं ध्यानमाह अदक्षिणे रत्नचषकं वामे सौवर्णपात्रकं करे दधाना देवी भामाश्लिष्टचिं
तयेदर्शं लक्षं जपेन्मनुवरौ पायसैरयुतं हुनेत् ८२ दक्षिणे करे रत्नचषकं रत्नपूर्णपात्रं दधानं

वामेकरे सौवर्णवेत्रकं दधानं दक्षिणवामभागयोर्देवीभ्यां रुक्मिणीसत्यभामाभ्यामाश्लिष्टं हरिं
चिंतयेत् मंत्रद्वयमपि लक्षं जपेदित्यर्थः पायसेन हुतं जुहुयादित्यर्थः ८३ एवं सिद्धमंत्रो मंत्री त्रै
लोक्यैश्वर्यभाग्भवेत् स्पष्टं पद्यद्वयं मंत्रांतरमाह तारश्रीशक्तिबीजाद्यं नमो भगवते पदं ८४
नंदपुत्रपदं ङेंतं भूधरो मत्त्वद्वृत्तन्युक् मांसांते वपुषे पूर्णमलोगा पाश्चाद्दशाक्षरः ८५ ॐ श्रीं क्लीं नमो
भगवते नंदपुत्राय भूधरो बकारः मनुवृत्तमाकारस्तद्युक्तः मांसांते लकारांते वपुषेरिति पदं
पूर्णमलोगायेत्यस्यांते द्वादशाक्षरः ॐ श्रीं क्लीं नमो भगवते नंदपुत्राय बालवपुषे पूर्णमलोगा
य क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहेति चत्वारिंशदक्षरो मंत्रः मांसांते वपुषे मंत्र
क्रमविंशतिवर्णाकरं निक्वचित्पाठस्तदा मांसांते वपुषेरस्यांते मंत्रो द्वादशाक्षरो मंत्रः रत्ननविं
शतिवर्णको मंत्र इत्यर्थः ८५ ऋषिर्ब्रह्मानुष्टुप्छंदः कृष्णाद्यादि तं समं अयं चास्य विसंपत्ति
सिद्धये सेव्यतां मनुः ८६ ब्रह्मात्र्यृषिरस्यानुष्टुप्छंदः अत्यानन्यासध्यानपुरश्चरणपूजनादि
कं सर्वं अष्टाविंशदक्षरद्वात्रिंशदक्षराभ्यां समं इत्यर्थः अयं च मंत्रः सर्वसंपत्तिप्रापमयं सेव्य
तां ८६ रुक्मिणीवल्लभाख्यं मंत्रमाह तारहृद्भगवान् ङेंतो रुक्मिणीवल्लभस्तथा शिरों ५९

96

नः षोडशार्णोयं हाक्किणीवल्लभाह्वयः ८७ तारं प्रणवः उक्तं नमः भगवान् ङेन्तः तथा हाक्किणी
वल्लभो ङेन्तः शिरः स्वाहा ॐ नमो भगवते हाक्किणीवल्लभाय स्वाहेति षोडशाक्षरो हाक्किणीव
ल्लभाख्यो मंत्ररत्नार्थः ८९ जपध्यानादिकमाह सफलं सर्वसंपत्प्रदो मंत्रो नारदोस्य मुनिः स्मृतः छं
दोनुष्टुप् देवता च हाक्किणीवल्लभो हरिः ९० स्पष्टोर्थः ९० पंचांगन्यासमाह एकद्वेदस्र
ति रंध्रवर्णैः स्यात् पंचकं ॐ हृदयाय १ नमः शिरसे २ भगवते शिखायै ३ हाक्किणीवल्लभा
येति सप्तभिः कवचं ४ स्वाहेति वर्णद्वयेन नेत्रं ५ इत्यंगपंचकं न्यसनीयं ध्यानमाह तापिच्छ
च्छविरंकगां प्रेयतमां स्वर्णप्रभामंबुजप्रोद्यद्वामभुजां स्ववामनुजया श्लिष्यन् सचिंतामणिना
श्लिष्यंतीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरं पायाद्वो वसनस्तु पीतवसनो नानाविभूषो हरिः ९१
नानाविभूषणभूष्को हरिर्वश्चिरं पायात् कीदृशः श्वसनस्य प्रसूनवत् पीते वसने यस्य सः
पुनः कीदृशः तापिच्छः काकतेंडिकाकोवाचोत्वीति भाषया तस्यच्छविः कः तिर्यस्य सः ता
पिच्छच्छविः कीदृक् स्ववामभुजपार्श्वे कगां स्वर्णप्रभां प्रियतमां हाक्किणीमाश्लिष्यन् आलि
गन् किं लक्षणया स्ववामभुजया चिंतामणिना चिंतामणिनाम सहितया कीदृशीं प्रियां अंबुजे

कृ० म
टी०
९८

९७

नश्चेत्तत्प्रसृमरत्त्वामम्भोजाक्षस्याः सा तां कीदृशी प्रियां स्वयं दक्षिणहस्तेनाश्लिष्यन्ते कीदृशो हरिः
अन्यहस्ते दक्षिणहस्ते विलसन्सो वंशी चेत्रं पक्षसत्अन्यहस्तविलसत्सो वंशी वेत्रः ४९ अस्य पुरश्चरण
माह ध्यात्वैवं हाकिनीनाथं जप्यात्सचामिमं मन्त्रं अयुतं जुहुयात्पद्मैररुणैर्मधुराप्लुतैः ५० एवं प्रा
गुक्तप्रकारेण हाकिनीनाथं ध्यात्वा इमं मन्त्रं लक्षं जप्यात् मधुराप्लुतैररुणैः पद्मैरयुतं जुहुयात् ५०
आवरणपूजामाह अंगैर्व्योमित्यमंगैरैर्नारदाद्यैर्दिगधिपैः वज्राद्यैरपि धर्मार्थकाममोक्षाप्तये
नरः ५१ अंगैः प्रथमावरणं नारदपर्वतादिभिर्द्वितीयावरणं इन्द्राद्यैस्तृतीयावरणं वज्राद्यैश्च
तुर्यावरणं एतैरावरणैः सह हाकिनीवल्लभं धर्माद्याप्तये हाकिनीनाथं नित्यमर्चयेदित्यर्थः ५१
मन्त्रान्तरमाह लीलादण्डापहृतगोपीजनसंसक्तदोःपदं दण्डान्तमालरूपेति मे चपलामपदं ततः ५२
भगवन्विस्मितस्त्वावज्जिजायान्तिको मनुः एकोनविंशाद्दशार्णस्य मतिर्नारददीरितः ५२ लीला
दण्डपदस्यावधौ अन्ते गोपीजनसंसक्तदोः इति पदं दण्डपदान्ते बालरूपेति पदं ततो मे चपलामपदं
भगवन्विस्मितस्त्वावज्जिजाया स्वाहान्तं तो मनुरेकोनत्रिंशाद्वर्णः इत्यर्थः लीलादण्डगोपी
जनसंसक्तदोर्दण्डबालरूपमेघश्याम भगवन्विलोस्वाहेति मंत्रः अस्य नारदो मुनिभीरितः ५३ छ ९८

देवतेष्टदेवतात्वलीलादंडहरिर्मता मन्त्रस्तिकरणाद्यास्तिवर्णैरंगक्रियामता ५४ अस्यानुष्टुप्छं
दः लीलादंडहरिर्देवतामता पंचांगन्यासमाह मन्त्रेति मन्त्रवस्तृतदंशा अब्रपञ्चवारः करणानिचवा
रि अत्रयस्त्रयः अब्रपञ्चवारः लीलादंडगोपीजनसंसक्तदोर्दंडरूपदयाय १ बालरूपधारिरसे २ मेघ
श्यामभावोहे ३ भगवन्तकवचं ४ विश्वाख्यानेत्रत्रयाय ५ इतिमन्त्रवर्णैरंगक्रियामनेत्यर्थः ५४ अ
स्यध्यानमाह संमोहत्रिजकमामकरस्यलीलादंडेनगोपयुवतीः पुरस्तदरीश्वमणाच्चितात्प्रियसर्वाससा
दलहस्तोदेवाश्चिर्यंतिहतकंसउरुक्रमोवः ५५ निहतकंसः कंसनिहन्तारंगमंडपेनिष्क्रितियावन् अ
नपवउरुमहान्क्रमःपराक्रमोयस्यसउरुक्रमोदेवोदोपुष्पाकंपायांदिपादयादित्यर्थः कीदृशोदेवः
निजप्रियसखोयोदामादयस्तेषामंसगःस्कंधस्योदत्तहस्तोयस्यसः तथानिजकःस्वाभाविकोमाया
मकरस्योलीलादंडस्तेनयथाकालेगोपयुवतीःपुरस्तदरीमध्यरासंदरीश्वमोमहयन् ५५ अस्यपुर
श्चरणमाह ध्यात्वैवंप्रजपेल्लक्षमयुतंतिलतंडुलैः त्रिमधक्तैर्जुहेनेदंगत्विक्पालाद्यैःसमर्चना ५६
एवंध्यात्वाउक्तप्रकारेणध्यात्वालक्षंप्रजपेत् तिलतंडुलैर्मिलितैस्त्रिमधक्तैर्हुत्वनमयुनाकेराक्षेरयुतंजु
हेत आवरणपूजनमाह अंगैरिति अंगैःप्रथमावरणं इन्द्राद्यैर्द्वितीयावरणं वज्राद्यैस्तृतीयावरणं ५६

क्र॰म॰
टी॰
६८

अथास्य फलमाह लीलादण्डहरिं यो वै भजते नित्यमादरात् । स पूज्यते सर्वलोके स्तं भजे दिंदिरा सदा ॥ ६७ ॥
स्पष्टोऽर्थोऽस्याः ॥ ६७ ॥ मन्त्रान्तरमाह त्रयोदशस्वरयुक् शार्ङ्गी मेदस केशवः । तथा मांसयुगं भायुक् शिरः समा
ख्यातो मनुः ॥ ६८ ॥ त्रयोदशः स्वर औकारः शार्ङ्गी गकारः मेदो वकारः केशवः अकारस्तद्युक्तः मांसयुगं सं
युक्तं लद्वयं भायस्वरूपं शिरः स्वाहा गौवल्लभाय स्वाहेति समाख्यातो मन्त्र इति फलितार्थः ॥ ६८ ॥ अस्यर्ष्या
दिकमाह आचक्राद्यैरंगक्लृप्तिर्नारदोऽस्य मुनिः स्मृतः । छन्द उष्णिग्देवता च गोवल्लभ उदाहृतः ॥ ६९ ॥ अथा
स्पष्टोऽर्थः ॥ ६९ ॥ अथास्य ध्यानमाह ध्येयोऽच्युतः सकपिलागणमध्यसंस्थस्ता आह्वयन् दधद्दक्षिणदोष्णि वेणुं
पाशं सयष्टिमपरत्र पयोदनीलः पीताम्बरोऽहिरिपुपिच्छकृतावतंसः ॥ ७० ॥ कपिलागणमध्ये संस्थितः स
प्रसिद्धोऽच्युतो ध्येयः कीदृशः ताः कपिला धेनूः आह्वयन् आकारयन् तथा दक्षिणदोष्णि वामबाहौ
वेणुं वंशं दधत् अपरत्र दक्षिणबाहौ यष्टिसहितं पाशं गोबंधनरज्जुं धारयन् तथाऽहिरिपोर्मयूरस्य पिच्छैः
कृतः अवतंसः शिरोभूषणं येन सः पयोदवत् नीलः ॥ ७० ॥ अथास्य पुरश्चरणमाह श्रुतिलक्षं जपेद्देनुजेत्सप्तस
हस्रकैः गोक्षीरेणांदिक्पालैर्मध्ये व्यापी गणाष्टकैः ॥ ७१ ॥ एवं मन्त्रं श्रुतिलक्षं चतुर्लक्षं जपेत् सप्तसहस्रकं गोक्षीरे
णैव जुहुयात् अंगानि अंगैः प्रथमावरणं गोगणाष्टकेन द्वितीयावरणं तद्युक्तं प्रथमावरणं कपिलादि द्वितीयं गौरपिंगला ६८

98

तृतीया रक्तपिंगाक्षी चतुर्थी गुडपिंगला पंचमी बभ्रुवर्णा स्यात्तु नमा कपिला गवां षष्ठी चक्रुलपिं
गाक्षी सप्तमी खुरपिंगा अष्टमी कपिला गोषु विज्ञेया पुच्छपिंगला पंचमी बभ्रुवर्णा स्यात्तु नमा कपि
ला गवां षष्ठी चक्रुलपिंगाक्षी सप्तमी खुरपिंगला अष्टमे कपिला गोषु विज्ञेया पुच्छपिंगलेति दिक्
पालेस्तृतीयाकरणं वज्रायेत्युक्तं चतुर्थावरणं १ अस्य प्रयोगमाह अष्टोत्तरसहस्रेण यः पयोभिर्दिनशोऽ
नेत् पञ्चाक्षमोगणेशाख्यो दशार्णेनैव वा विधिः अनेन मंत्रेण दिनशः प्रत्यहं यः पयोभिरष्टोत्तरसह
स्रं जुहुयात् सः पञ्चाक्षरो गणेशाख्यो भवति वा अथवा अयमष्टोत्तरसहस्रहोमविधिः प्रथमपटलोक्त
दशाक्षरमंत्रेणैव कर्तव्य इति शेषः २ मंत्रान्तरमाह सत्त्वो वासुदेवो ऽन्तं ऊं तेन च भगवत्पदं श्रीगोविंद
पदं तद्वत् द्वादशार्णोयमीरितः ३ लवो विंदुः वासुदेव ओकारः एतेन नमः भगवत्पदं ते तच्चतुर्थ्यंत ओं न
मो भगवते श्रीगोविंदायेति मनुर्द्वादशार्णोयमुक्त इत्यर्थः ४ ऋष्यादिकमाह मनुर्नारदगायत्रीकृ
ष्णाख्या दिव्यांगकं एकाक्षिवेदभूतादैः समस्तैरपि कल्पयेत् ५ अस्य ऋष्यादिकं ऋषिश्छंदेवतं ना
रदादिकमित्यर्थः ओं मित्येकेन हृदयाय नमः इत्यक्षिभ्यां शिरसे नमः भगवते इति वेदैः शिखायै श्री
गोविंदायेति भूतैः कवचाय समस्तमंत्रेण नेत्रत्रयाय इत्यंगकं पंचांगकं कल्पयेत् ५ अस्य ध्यानमाह

वंदेकल्पद्रुमूलाश्रितमणिमयसिंहासनेसंनिविष्टंनीलाभंपीतवस्त्रंकरकमलतलसद्वेणुवेत्रंस्मरारिं
गोभिःसप्रस्रवाभिर्वृतममरपतिप्रोद्धहस्तस्थकुंभप्रद्योतत्तोयधाराप्लावितमभिनवांभोजपत्राभ
नेत्रं ५ अथस्मरारिंवंदे कीदृशं कल्पद्रुः कल्पवृक्षस्तस्यमूलंआश्रितेसमणिमयसिंहासनंतत्रसंनिविष्टं
उपविष्टं नीलाभं पीतंवस्त्रंयस्यतं करकमलयोर्वामदक्षिणयोःक्रमेणलसतीशोभावेणुवेत्रेयस्य
तं वेत्रंवेणुमयीयष्टिः तथासप्रस्रवाभिःक्षरत्स्तनसहिताभिर्गोभिर्वृतं अमरपतेरिंद्रस्यप्रोद्धः
प्रोन्नतोयोहस्तस्तत्रस्थितोयःकुंभस्तस्मात्प्रच्योततीयासौतोयधारा अमृतमयधारातयाप्लावितं
तथाअभिनवप्रत्यग्रविकसितंयदंभोजंतत्पत्रमाभेनेत्रेयस्यतं ५ अथपुरश्चरणमाह ध्यात्वैवमच्यु
तंजप्याद्रविलक्षंजितेंद्रियः जुहुयाद्द्वादशसाहस्रंदिनशोऽभ्यंसमर्चयेत् ६ एवमच्युतंध्यात्वारविलक्षंद्वा
दशलक्षंजप्यात्ततोनंतरंजुहुयाद्द्वादशसाहस्रंजुहुयात् दिनशः प्रतिदिनमसंहरिंअर्चयेत् ७ पू
जायांस्थानविशेषमाह गोष्ठेप्रतिष्ठितेवास्वगेहेवाप्रतिमादिषु समस्तपरिवारावीतेपुनर्दिक्पाला
पार्षदः ७ गोष्ठेगवांस्थानेआश्रमगेहेवाप्रतिमादिषुप्रतिष्ठितंआवाहितं आदिशब्देनजलाग्निसू
र्यमंडलेषुप्रतिष्ठितंदिनशोऽर्चयेदिति प्राक्तनेनसंबंधः पूजाक्रममाह समस्तेति समस्तपरि ९९

वारोपेनायास्तुनायनमः नंदंने विस्वपार्षदेभ्यो नम इति विस्वपार्षदाः द्वाराग्रे पूर्वादिद्वाराग्रभागे
स्थिते बाने पीठेर्व्यारस्यथेन नेन संबंधः ९ द्वाराग्रे बलिपीठेर्व्याः पत्नीदस्त्र ततोग्रतः चंडप्रचंडौ प्राग्धा
त्रविधानारौ च दक्षिणे ८ जयः सविजयः पश्चाद्बलः प्रबल उत्तरे ऊर्ध्वं द्वारश्रियं चेष्ट्वा द्वार्षं तान् पूज्य
योर्चयेत् ९ पूज्यो वास्तुपुमांस्तत्र तद्द्वाः पीठस्य मध्यतः द्वारांतः पार्श्वयोर्व्यागंगा च यमुनानदी १०
कोणेषु विघ्नं दुर्गां च वाणीं क्षेत्रस मर्चयेत् अर्चयेद्वास्तुपुरुषं वेश्ममध्ये समाहितः ११ नारंगाडंप
टंडंतेसपूर्वं वशारं तनं ॐ फट्नतिमपुस्काम्भमद्यायास्थितो हरेः १२ पुष्पांजलिं क्षिपेदिक्षु समासी
नासनेनतः विधेयमेतत्सर्वं पुस्थापितेषु विशेषतः १३ ततोग्रतस्तस्य पुतस्याग्रतः तद्द्वाः पीठस्य म
ध्यतः द्वारपीठयोर्मध्ये पत्नीद्वामहुओभ्यर्च्यः तत्र द्वारपीठयोर्मध्यतएव वास्तुपुमान् रत्नपात्र स्तत्र क
र इति ध्यात्वा रत्नमंडपायनम इति यागगेहोपरि पूज्यः इत्यष्टमदशमयोरन्वयः प्राक्सर्वं द्वारादिद
क्षिणोत्तरपार्श्वयोरिति सर्वत्र संबंधनीयं चंडप्रचंडौ पूज्यौ दक्षिणद्वारि धात्रविधानारौ पूज्यौ पश्चा
त् पश्चिमद्वारे जयविजयौ पूज्यौ बलप्रबलौ उत्तरद्वारे पूज्यौ द्वारश्रियः पूजानंतरमेवैतौ वण्डादिकौ
पुमशः पूज्याविन्याह नद्वैतिर्यग्मूर्ध्वफलके श्रीद्वारश्रियै नम इति मंत्रेण द्वारश्रियं च द्वाःस्थं संपूज्य द्वा

क्र॰ म॰
दी॰
१०

100

र्षु प्रागादिद्वारेषु पतान् चंडप्रचंडादीन् चंडप्रचंडाभ्यां नमः इत्यादिमंत्रैर्गुरुमपाः अर्चयेत् द्वाःस्थेशानिति
पाठे द्वाःस्थाश्च ते ईशाश्च द्वाःस्थेशास्तान् द्वारपालानित्यर्थः एवं च तद्वारेषु गुरुमुखो द्वारपालपूजां विधा
य दक्षिणपादेनांतः प्रविश्य द्वारांतः पार्श्वयोर्दक्षिणोत्तरयोर्गंगायै नमः यमुनायै नमः इति मंत्रेण गंगां
च यमुनां च नदीसे पूज्ये इत्यर्थः अथ द्वारपार्श्वयोरूर्ध्वपरिभागे दक्षिणे शंखनिधये नमः उत्तरभागे पं
द्मनिधये नमः इति संपूज्य तदनंतरं कोणेषु आग्नेयादिष्वभ्यंतरकोणेषु क्रमेण विघ्नेशं दुर्गां वाणीं
क्षेत्रपालं च अर्चयेत् अथ देवमध्ये वास्तुपुरुषं प्रागुक्तलक्षणं समाहितः सन् अर्चयेत् ॥ अस्त्रमंत्रम
हरति तारं प्राङ्‌पदं ङेंतमिति तारं प्रणवः प्राङ्‌पदं ङेंतं च वर्णं तं च तथ्य शरपदं सकारोपपदं ॐ प्रा
ङ्गाय सशराय फट् नमः इत्यस्त्रकाण्डध्यात्मनादिकमभिमंत्र्य हस्तेऽन्तः स्थितः सन् नाराचमुद्रया दि
क्षु पुष्पांजलिं क्षिपेत् एवं विघ्नसंघानुत्तिः साधनतस्तदनंतरं ॐ श्रीं ह्रीं क्लीं आधारशक्ति
कमलासनाय नमः इति स्वासनाय नमः इति स्वासनमभ्यर्च्य समासीनास्तेनेनतः एतत्सर्वं त्वयावि
धेयं स्थंडिलादिपूजास्वपि स्थापितेषु विशेषतः कर्तव्यमित्यर्थः ।२। आत्मार्चनं ततः कृत्वा गुरुपंक्तिं गुरो १०
रुवत् श्रीगुरून् परमाद्यांश्च महास्मन्त्रवर्ष्टिकान् ।४। नत्वा अङ्कानारदादीन् पूर्वसिद्धाननंतरं ॥

ततो भागवतांश्चैव ब्रह्मा विघ्नेशं दक्षिणेर्चयेत् १५ ततः आत्मानं कृत्वा पुरोक्तवत् वर्तयेत् पटलोक्तवत्
पीठस्योत्तरभागे वायव्यकोणादीशकोणपर्यंतं गुरुपंक्तिं प्रर्चयेत् गुरुपंक्तिविशदयति श्री
गुरुभिः श्रीगुरून् श्रीमत्परमगुरून् श्रीमदाद्यगुरून् श्रीमन्महागुरून् श्रीमदस्मद्गुरून् श्रीमत्सर्वगु
रूनित्यर्थः १४ तत्पादुकाः इति गुर्वादिपादुकाभ्यो नमः नारदादिदिव्यर्षिभ्यो नमः पूर्वसिद्धेभ्यो नमः म
हाभागवतेभ्यो नमः अथ दक्षिणे विघ्नेशमर्चयेत् १५ एवं वत्पीठमभ्यर्च्य श्रीगोविंदमथार्चयेत् रु
क्मिणीसत्यभामा च पार्श्वयोरिंद्रमग्रतः १६ एवं ततः स्वरमिं वेष्ठाकेसरेष्वंगदेवताः अभ्यर्च्या हृदादि
वर्मांतादिक्ष्वस्त्रं कोणके पुन १७ कालिंदीरोहिणीनग्नजित्याथाः षट्च शक्तयः दलेषु पीठकोणे
षु वस्त्रादि किंकिणीस्तथा १८ दामानि पद्मयोः पीठे पुनपुरः श्रीवत्सकौस्तुभौ अग्रतो वनमालां च रि
त्क्ष्टासुतनोर्चयेत् १९ पांचजन्यगदाचक्रं वसुदेवदेवकी नंदगोपयशोदा च सगोगोपाल
गोपिका २० इंद्राद्याः कुमुदाद्याश्च विष्वक्सेनं ततो नरो एवं वत् आधारशक्तिमारभ्य पीठमं
त्रांतं संपूज्य अथ गोविंदमर्चयेत् आवरणपूजामाह रुक्मिणीमिति कर्णिकायामेव पार्श्वयोर्द
क्षिणवामयोः रुक्मिणीसत्यभामां च प्रार्चयेत् अग्रत इंद्रंष्टततः स्वरतिं चेष्टा हृदादि वर्मांतान्

क्र॰ म॰
दी॰
९१

चारोंगदेवतादिस्त्वकेसरेषुअष्टदलस्यप्रागादिकेसरेषुहृदयांगदेवतायैनमइत्यादिमंत्रेणअर्च्याः
कोणेषुअष्टदलस्याग्नेयादिदलकेसरेषुअस्त्रांगदेवतायैनमइतिमंत्रेणास्त्रमचर्चयेदित्यर्थः ७ द
लेषुमहिष्यावरणंतत्रतीयमाह कालिंदीतिकालिंदीरोहिणीभ्यांयुक्ताश्चतानग्नजित्याद्याख्येतिवि
ग्रहः कालिंदीरोहिणीभद्रानग्नजितीप्रादिपाद्वेनसुनंदामित्रविंदासुलक्षणाजांबवतीसुशीलेतिअ
ष्टसुदलेषुप्रागादिक्रमेणपूज्याइत्यर्थः चतुर्थावरणमाह पीठेति वह्न्याद्यग्नेयादिपीठकोणेषु
किंकिणीस्तुइचंदिका १ दामानिगोवंधनरज्जवः २ यष्टिपा ३ गोप्रेरणार्थंलगुडाः वेणुः ४ पुरः श्रीवत्स
कौस्तुभौ ५ अग्रतोदेवस्याग्रेवनमालांच ६ पूजयेत पंचमावरणमाह दिाद्विति दिक्ष्वष्टदलस्यपू
र्वादिदलेषुपांचजन्यं १ गदां २ चक्रं ३ वसुदेवं ४ देवकीं ५ नंदगोपं ६ यशोदांच ७ किंलक्षणाएते
गोपालगोपिकाभिः सहवर्तमानास्सगोपालगोपिकाः १८ पंचमावरणमाह इंद्राद्याइति षष्ठाव
रणमाह कुमुदाद्याइति पूर्वादिदलेषुकुमुदाद्याअष्टक्रमेणदेवासुरयक्षगंधर्वपितृनागराक्ष
सपिशाचानांगृहाधिपतयः कुमुदायदेवगृहाधिपतयेनमइत्यादिमंत्रैःपूज्याः तथाउत्तरेपीठस्योत्त
रेपीठस्योत्तरभागेविश्वक्सेनंपरमेश्वरस्यभांडाराधिपतिंअर्चयेत कुमुदादीनांनामान्याह कुमुदा ९१

10

कृष्णदासस्त्रपुंडरीकोथवामनः २१ शंकुकर्णः सर्वनेत्रः सर्वत्रसुप्रतिष्ठितः स्तोत्रार्थः श्रवणस्य
फलमाह एककालेद्विकालेवात्रिकालेवापिगोधुगं २२ श्रीगोविंदंयजेन्नित्यं गोभ्यष्टपवसप्रदः
दीर्घजीवीनिरातंकोधेनुधान्यधनादिभिः २३ श्रुत्वैर्मित्रैरिहाप्योते प्रयातिपरमंपदं गोधुगं श्रीगो
विंदंत्रिकालंदैयोयजेत् कीटघ्नः गोभ्यपवसंतरणंप्रददातीतिपूर्वसप्रदः एवंसंतरणमर्जन्नमि
त्यमरः सदीर्घजीवीत्यादिकोभवेत् अंतेदेहांतेपरमंवक्रंश्रीविष्णोःपदंप्रयाति २३ मंत्रांतर
माह ॐ ध्वंदंतयुतः शार्ङ्गीचक्रीदक्षिणकर्णयुक् मांसंनाप्यायनंत्यंतोमूलमंत्रोष्टवर्णकः २४ ॐ
ह्वंतः ओकारः शार्ङ्गीगकारः चक्री ककारः दक्षिणकर्णउकारः मांसंलकारः नाप्यायेतिस्वरूपं
नतिर्नमः गोकुलनाथायनमः इत्यष्टवर्णकोमूलमंत्रः अस्यैवस्वाहांतोध्ययमष्टाक्षरोस्नौस्वाऽः २४
न्यासादिकमाह ऋषिर्ब्रह्मास्यगायत्रीछंदः कृष्णस्तुदेवता वर्णपुंजैः समस्तेनप्रोक्तंस्यादंगपं
चकं २५ ब्रह्माऋषिर्गायत्रीछंदः कृष्णोदेवता ॥ गोकुहृदयायी लनाथशिरसेनूथ्यायशिखाये
न्नमः कवचाय ष गोकुलनाथायनमः नेत्रत्रयाय ५।२५ अस्यध्यानमाह पंचवर्षमतिदृप्त
मंगणेधावमानमतिचंचलेक्षणं किंकिणीवलयहारनूपुरैरंचितंनमतगोपबालकं २६ सु

क्रि॰म॰
टी॰
१०२

यंगोपबालकंनमत कीदृशं पंचवर्षयुक्तं तथाअतिदृप्तं अतिवलितं अंगणेधावमानं अतनपवयं
वलनेत्रं किंकिणयादिभिरंचितंभूषितमित्यर्थः २९ पुरश्चरणमाह ध्यात्वैवंप्रजपेदष्टलक्षंतावत्स
हस्रकं जुहुयाद्दलसहस्रदोक्षसमिद्भिः पायसेनवा २७ एवंध्यात्वाअष्टलक्षंप्रजपेत् अष्टसहस्रंजुहुया
त् काभिः बिल्वदलैःपलाशलजइत्यसमिद्भिःअथवापायसेन २७ अर्चनमाह प्रासादेस्थापितंकृष्ण
मखवानित्यमर्चयेत् द्वारपूजादिपीठार्चनांतंकृत्वोक्तमार्गतः २८ प्रासादेगृहेस्थापितंकृष्णमम
नामंत्रेणनित्यमर्चयेत् किंकृत्वाप्रागुक्तमार्गतः द्वारपूजादिपीठार्चनांतंकृत्वा २८ आवरणा
र्चनविधिमाह मध्येर्चयेद्धरिंदिक्षुविदिक्षुदेवगातिचक्रमात् वासुदेवःसंकर्षणःप्रद्युम्नश्चानिरु
द्धकः २९ रुक्मिणीसत्यभामाचलक्ष्मणाजांबवत्यपि दिग्विदिक्ष्वर्चयेः देतातिंद्रवज्रादिकान्
बुधः ३० अष्टदलस्यमध्येकर्णिकायांहरिंअर्चयेत् दिक्षुप्रागादिषुहृदादिवर्मांतानिअग्राति
विदिक्षुःअस्त्रमितिविवेकः द्वितीयावरणपूजनमाह वासुदेवइति वासुदेवादयःप्रागादिदि
क्षु रुक्मिण्यादयआग्नेय्यादिविदिक्ष्विति विभागः तृतीयचतुर्थावरणेआह इंद्रेति अष्टदलाब
हिरिंद्रादीन् तद्बहिर्वज्रादीनर्चयेदित्यर्थः ३१ अस्यफलमाह योमंत्रमेतंजपेन्नित्यविधिनेत्यर्चय १०२

102

नहरिं ससर्वं संपसंपूर्णो नित्यं शुद्धपदं व्रजेदिति यः इति प्रागुक्तविधिना नित्यं हरिं सर्वं पन् अस्य मंत्रं जपे
त् स इह नित्यं सर्वसंपत्संपूर्णः स्यादेहपाताऽनंतरं शुद्धं परमेश्वरस्य पदं व्रजेत् ३१ सिद्धिगोपालमंत्रमाह
ताः श्रीशक्तिमारांते श्रीकृष्णायपदं वदेत् श्रीगोविंदायतस्मोर्द्धं श्रीगोपीजन इत्यपि वल्लभाय ततः
स्त्रिः श्रीसिद्धिगोपालकः मनुः पंचविंशत्यक्षरः ॐ श्रीं ह्रीं क्लीं श्रीकृष्णाय गोविंदाय श्रीगोपीजनव
ल्लभाय श्रीं श्रीं श्रीं अयं सिद्धिगोपालसंज्ञको मंत्रः ३२ अस्य ध्यानमाह माधवीमंडपासीनो गरुडेनाभि
पालितो दिव्यक्रीडासु निरतो रामकृष्णः स्मरन् जपेत् ३३ माधवीवासंतीलतानस्या मंडपासीनो
गरुडेन सेवितो दिव्यक्रीडासु निरतो बलदेवजनार्दनौ स्मरन् मंत्रं जपेदित्यर्थः ३४ एकाक्षरादि
मंत्रानाह चक्री वह्निस्वरयुतः सर्वकार्यप्रदो मतः कृष्णेति द्व्यक्षरः कामपूर्वस्त्र्यर्णः स एव च ३५ च
क्लीं ककारः वह्निः रः स्वरः ईकारस्तेन युतः सबिंदुविसर्गयुक्तः कृः इत्येकाक्षरो मंत्रः कृष्णेति द्व्यक्षरः सः
कृष्ण एव कामबीजपूर्वस्त्र्यक्षरः क्लीं कृष्ण ३६ स एव चतुर्वर्णः स्यात् ङेंतो न्यस्तु अक्षराक्षरः वक्ष्यते पंचव
र्णः स्यात् कृष्णाय नम इत्यपि ३७ स एव क्लीं कृष्ण इत्येवं तेंक्लीं युक्तश्च अक्षराक्षरः स्यात् ङेंतः क्लीं कृष्णा
येत्येवं रूपोऽष्टाक्षरः स्यात् पंचवर्णः वक्ष्यते कृष्णाय नम इत्यपि पंचाक्षरः स्यात् ३८ अपर

क्र·म·
दी·
९२

103

पंचाक्षरमाह कृष्णायेति स्मरहृद्‌मध्यं पंचाक्षरोऽपरः गोपालायाग्निजायायं षडक्षर उदाहृतः क्लींकृष्णा
य क्लीं इति कामबीजं हृदंमध्ये पंचाक्षरः अपरः १ गोपालायस्वाहेति अयं षडक्षर उदाहृतः २५ अपरं षडक्ष
रमाह कृष्णाय स्मरबीजाद्यो वह्निजायान्तिकोऽपरः षडक्षरः प्राग्उदितकृष्णगोविंदकौ पुनः सप्तर्थीस
मपवर्णः समार्णौ न्यः प्रोदितः २६ क्लीं कृष्णाय स्वाहेति द्वितीयः अपरस्तृतीयः क्लीं कृष्णाय नम इत्ये
वं रूपः प्राक् पंचमे पटले प्रदितः कथितः सप्ताक्षरमाह कृष्णेति: कृष्णाय गोविंदायेत्येकः समवर्णः
अन्यस्सप्तवर्णः बालवपुषे स्वाहेत्येवं रूपः प्रोदितः षष्टे पटले कथितः २८ चतुर्थ सप्ताक्षरमाह श्री
शक्तिमारा कृष्णाय मारः सप्ताक्षरोऽपरः श्रीं ह्रीं क्लीं कृष्णाय क्लीं इत्येवं अपरः चतुर्थः सप्ताक्षर इत्यर्थः
अष्टाक्षरमाह कृष्णगोविंदकौ ङेंतौ स्मरद्या वृष्टवर्णकः २९ क्लीं कृष्णाय गोविंदायेत्यष्टवर्णकः
अष्टाक्षरांतरमाह दधिभक्षणङेवह्निजायाभिरपरोऽष्टकः सुप्रसन्नात्मने प्रोक्तानम इत्यपरोऽष्टकः ३०
दधिभक्षणाय स्वाहेत्यपरो द्वितीयः सुप्रसन्नात्मने नम इत्यपरस्तृतीय इत्यर्थः ३१ मूलमंत्रसंतमपरम
ष्टाक्षरमाह प्राक् प्रोक्तो मूलमंत्रश्च नवार्णः [illegible] सिद्धिरित्येकः २१·२
(ह अन्येषामेकविंशतिमंत्राणां उक्तसंख्यया तर्पणमेव विहितमित्यर्थः अर्चनमाह नित्यमर्चयेत्)

रसंपुटो क्लसगोविंदकाँ ङेन्तोनमोंतोचनवाणिकः ३५ स्तलमंत्रसंस्तकोमंत्रश्चापरोगोज्वलनाथायनमर
स्त्वष्टवर्णः प्रागुक्तइत्यर्थः नचात्तरमाह नवेति स्मरसंपुटोप्याग्रंतयो क्लीं बीजसंपुटकोवनतत्पश्यतोक्लस
गोविंदकोनचात्तरः तावेवनमोंतोचनवाणिकइत्यर्थः ३५ दशात्तरमाह क्लींग्लौंक्लींश्यामलांगायेन
मः स्वोदशार्णिकः शिरोंतोबालवपुषेक्लींकृष्णायाग्नेर्मनमनः ४ः बीजत्रयोपेतः श्यामलांगायनमइत्येकाद
शार्णस्यात् शिरोंतः स्वाहांतः बालवपुषेकृष्णायस्वाहेत्येवंत्रपञ्चान्योदशात्तरइत्यर्थः ४ः एकादशात्तरमा
ह ॥ शिरोंत्ये बालवपुषेक्लींकृष्णायस्वतोत्रुधेः एकादशात्तरोमंत्रएतेषांनारदोमुनिः ४। बलवपुषे
क्लींकृष्णायस्वाहेतिएकादशात्तरोमंत्रोबुधेः स्मृतइत्यर्थः एतेषांसर्वेषामेकात्तरादीनांनारदोमुनिः ४।
छंदस्तदेवीगायत्रीदेवताकृष्ण - रितः कलषट्दीर्घकेरंगमथामुचिंतयेद्धरिं ४। देवीगायत्रीछंदः क्लस
- षांदेवताहरितः कथितः न्यासमाहेति कालेति कलाभ्यांव्यंजनाभ्यांयुक्ताश्चतेषट्दीर्घकाश्चकलषट्
दीर्घकास्तैः कलषट्दीर्घकास्तैः क्लांक्लींक्लूंक्लैंक्लौंक्लः इत्येवंरूपैरंगकंअंगन्यासंकुर्यादित्यर्थः अथानंतरमुक्त
हरिंवक्ष्यमाणप्रकारेणहरिंचिंतयेद्ध्यायेदित्यर्थः ४। ध्यानमाह अव्याद्व्याकोषनीलांबुजरुचिवरुणा
भोजनेत्रांबुजस्थोबालोनंदाकटीरस्थलकलितरणत्किंकिणीकोमुकुंदः दोर्भ्यांहैयंगवीनंदधदति

क्र॰म॰
दी॰
९४

104

विमलं कायं यस्य स विश्वं वपो गोगोपीगोपवीतो हरन्नवविलसत्कंठभूषश्चिरं वः ॥ ४२ ॥ मुकुंदो बालो गोपाङ्गु
ष्मान्नाचिरंशुव्याप्त्यालयतत्कौटपाः व्याकोषं विकसितं यन्नीलेवु जेन दक्षविपर्यस्तत्वाच्च रूपं भोजनवत्
नेत्रे यस्य । तथाच अंबुजे तिष्ठतीति अंबुजस्थः व्याकोषनीलांभोजरुचिश्चासौ अंबुजस्थश्चेति त्रिपद
कर्मधारयः तथा जंघयोः कटीरस्थले कटितटे च कलिताः सर्वदा रणंत्यः द्वादशघंटिका यस्य सः त
थाहारः नखेन व्याघ्रनखेन विलसत्कंठभूषः कंठाभरणं यस्य सः हैयंगवीनं वामकरे दक्षिणकरे पाय
समित्यवर्णनयं विश्वक्षस्वं वयः गोभिर्गोपीभिर्गोपैश्च वीतः परिवेष्टितः ॥ ४८ ॥ पुरश्चरणमाह
ध्यात्वेवमेकमेतेषां लक्षं जप्यात्मनं ततः सर्पिः सितोपलोपेतैः पायसैरयुतं जुहुयात् ॥ ४९ ॥ प
तेषां मंत्राणां मध्ये एकैकं विन्मंत्रं लक्षं मनं जप्यात् ततः सर्पिषा शर्करया खंडेन युतेः पायसैः अयु
तं जुहुयात् ॥ ४९ ॥ पुरश्चरणांगतर्पणमाह तर्पयेत्तावदन्येषां मनूनां ज्ञतसंख्यया तर्पणं विहितं नित्यमर्च
येत्त्वमिहितः ॥ ५२ ॥ पुरश्चरणशेषत्वपायतनशर्कराखंडमिश्रैरयुतं तर्पयेत् एकादशप्रारभ्यैकादशाक्षरप
र्यंतमक्ष्णजपहोमतर्पणैः पुरश्चरणमेकस्मिन्नेकविंशतिमंत्राणां पुरश्चरणं विनैवाष्टतर्पणेनैव सि
द्धिरित्याह अन्येषामेकविंशतिमंत्राणां ज्ञतसंख्यया तर्पणमेव विहितमित्यर्थः अर्चनमाह नित्यमर्चयेत्त ९४

समाहित इति ४२ आवरणान्याह वह्न्यादीशांतमंगानि हृदादिकवचांतिकं अग्रे चैव पुरतो नेत्रमस्त्रं दि
क्षु वह्निः क्रमात् ४४ वह्निदिशामारभ्य ईशानपर्यंतं हृदादिकवचांतमंगानि चत्वारि पूजयेत् पुरतो
नेत्रं पूजयेत् अस्त्रं पूर्वादिदिक्षु इति क्रमादर्चयेदित्यर्थः पूजनमुपसंहरति सपर्यैषा समीरितेति
प्रागुक्तमंत्राणां भजनफलमाह इत्येकमेषां मंत्राणां भजेद्यो मतवित्तमः ४ करप्रचेयाः सर्वा एवास्य सोपू
ज्यते ऽमरैः ४५ एषामेकादशाक्षरपर्यंतानां मध्ये एकं मंत्रं भजेत् तस्य सर्वा ऋद्धयः करप्रचेयाः हस्तग्राह्याः
स्युः असौ साधकः अमरैः पूज्यते चेत्यर्थः अथ मंत्रांतरमाह सद्यःफलप्रदं मंत्रं वक्ष्येऽन्यं चतुरक्षरं सप्रो
क्तो मारपुटं मान्तरस्य कुसुमपदेन तु ४६ अन्यं चतुरक्षरं सद्यःफलप्रदं वक्ष्ये स मंत्रः क्लीं बीजद्वयस्य कुसु
मपदेन प्रागुक्तः क्लीं कुसुम क्लीं इत्येवं रूपः ४६ ऋष्यादिकमाह ऋष्याद्यमंगाः षट्कं प्रागुक्तं प्रोक्तमस्य तु
नारदगायत्री कुसुमाः ऋष्याद्य क्लां क्लीं क्लूं क्लैं क्लः इत्यंगानि इति प्रागुक्तमेव ऋष्याद्यमंगषट्कं वास्य प्रो
क्तमित्यर्थः ४८ विंशत्यर्णमंत्रोक्तं ध्यानमाह ॥ श्रीमत्कल्पद्रुमूलोद्गतकमललसत्कर्णिकासंस्थितो
यस्तच्छाखावलंबिपद्मोदरविसरदसंख्यातरत्नाभिषिक्तः हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलं भास
यन्वासुदेवः पायाद्वः पायसादो दधिनवनवनीतामृताशी वशीनः ४७ सवर्णीजितेंद्रियो बालरु

क्रं॰म
टी॰
१०५

105

नियावत् वासुदेवो नः पायात् यः श्रीमत्कल्पद्रुममूले सिंहासनोद्गतं यत्कमलं तस्य लसंती या कर्णिका तत्र
संस्थितः कीदृशः तस्य कल्पद्रुमस्य शाखावलंबीनि यानि पद्मानि तेषां उदरात् मध्यप्रदेशात् विसरंति ग
लंति यानि अप्रसंख्यानरत्नानि तैरभिषिक्तं तथा हेमाम्बरवाभाय स्य सहेमाभः पुनः कीदृशः स्वस्य प्रभाभिः अ
खिलं त्रिभुवनं भासयन् तथा पायसेअश्नीतीति पायसादः पुनः कीदृशः दधि च नवेन वनीतं च ते एव अ
श्नते अश्नातीति दधिनवनीतं त्वपायी वशीकृतत्रिभुवनं यस्मात् सो वा यो योगद्वायपीजितेंद्रियः शिशुरिति
यावत् ४० पुरश्चरणमाह ध्यात्वैवं प्रजपेल्लक्षं चतुष्कं जुहुयात्ततः त्रिमध्वक्तैः बिल्वफलैः हुत्वा विंश
त्सहस्रकं ४८ एवं ध्यात्वा लक्षचतुष्कं जुहुयात् ततो हुतं मधुत्रयाक्तैः बिल्वबलैः हुत्वा विंशत्सहस्रकं
जुहुयात् ४८ अंगैस्तिथिमितैर्द्राघैर्व्याघैरर्घैर्वेनोदिना तर्पयेद्दिनशः कुसंख्याउत्तरयपिपाजलैः ४९
पंचांगैरष्टतिथिमितैर्द्राघैरष्टभिर्वन्याद्यैः शाष्टभिरर्घैनीनाष्टशताउदिना स्वाहुत्रयप्याभावितैर्जलैर्दि
नशः प्रतिदिनं कुसुमस्य भवोबुजेन तर्पयेत् अपरिमितधनायवामयेरतिपोषः ४९ अथ मंत्रांतरमा
ह ॥ मारयोरस्मं मांसाधोरक्तं च दपरो मनुः षडंगान्यस्य कलरदीर्घैः मंत्राणो वामणः ५० अस्येदानीमे
वोक्तं चतुर्दत्वरस्य मे च स्य षद्याणोन्याद्यंतः स्य पोमीवयोक्लीं बीज योमीसाधः - कारापस्तारक्तं भस्म

वेणुरिष्टं स्यात् तदाश्रयपरः स यः फलप्रदो मंत्रः इत्यर्थः ॥ क्लीं कामः क्लीं रित्येवं मंत्रः न्यासमाह षडंगानीति अ
स्य मंत्रराशिरेव मणिः षडंगानि कल्पयेत् संयुक्तैः दीर्घैः क्लां क्लीं क्लूं क्लैं क्लौं क्लः इत्येवं रूपैः षडंगमाह षडंगानी
ति अस्य मंत्रराशिरेव मणिः षडंगानि कल्पयेत् संयुक्तैः न्यासः कार्य इत्यर्थः ॥ ५० ॥ अस्य ध्यानमाह आर
क्तोद्यानकल्पद्रुममणिविरलसत्स्वर्णदोलाधिरूढं गोपीभ्यां प्रेङ्ख्यमाणं विकसितनवबंधूकसिंदू
रभासं बालं नीलालकान्तं कटितटविलसत् क्षुद्रघंटाघटाढ्यं वंदे शार्दूलकामांकुशललिता
गलाकल्पदीप्तं मुकुंदं ॥ ५१ ॥ अहं बालं मुकुंदं वंदे आरक्तोद्यानकल्पद्रुमस्तस्य मणिविरलसंतीया
स्वर्णदोला तामधिरूढं गोपीभ्यां प्रेङ्ख्यमाणं चाल्यमानं विकसितेन नवबंधूकपुष्पसिंदूरपुष्पेण वत्
भाः यस्य तं वक्राः श्यलकान्ताग्रकेशा यस्य तं कटितटे विलंबमानघंटावलाः क्षुद्रघंटास्तासां चटमास
मूहेन आढ्यं संबद्धं शार्दूलस्य यः कामांकुशो नखस्तेन कलितः संबद्धो यो गलाकल्पः कंठाभरणं ते
न दीप्तं ॥ ५१ ॥ अस्य पुरश्चरणमाह ध्यात्वैवं एवं कृष्णं प्रभजन्न रक्तोत्पलैर्नवैः मधुत्रयप्लुतैर्हुत्वा एवं व
दतिमर्चयेत् पद्याप्लवं ध्यात्वा एवं कृष्णं प्रति तत्र तदंकं जपावात्मधुरत्रयप्लुतैर्नवैरक्तोत्पलैः हुत्वा विं
शत्सहस्राणि एवं वक्ष्यमाणं न तिथिदिक्पालवस्त्वाद्यैः स्वगणैः एवं वदतिमर्चयेदित्यर्थः ॥ ५२ ॥ प्र

क्र॰म
दी॰
१०८

106

योगमाह मधुरत्रयसंयुक्तामारक्तां शालिमंजरीं जुहुयान्नित्यशोऽष्टोर्द्धं शतमेकेन मंत्रयोः ५२ म
धुरत्रययुक्तां अरुणां शालिमंजरीं मंत्रयोरुभयोरुक्तयोर्मध्ये एकेन विदेकेन नित्यमष्टोत्तरशतं जु
हुयात् ५३ होममफलमाह तस्य मंडलतः पृथ्वी पृथ्वीसस्यकुलाकुला स्याच्छालिपुंजपूर्णेव तद्गेह
मास्य प्रजायते ५४ तस्योक्तहोमं कुर्वतः मंडलतः एकोनपंचाशादिनानंतरं पृथ्वीबहुतरा पृथ्वीम
हीधान्यकुलेजधान्यसमूहेनाकुलव्याप्तास्याद्भवेत् तद्वेष्मतस्य गृहं शाश्वच्छालिसमूहपूर्णं प्र
जायते ५४ मंत्रद्वयाभ्यंतराराधनफलमाह यस्त्वेतयोर्नियतमभ्यंतरं भजेत मंत्रयोर्जपार्चनहुता
दिभिरात्मभक्तिः श्रीमान् स मन्मथ इव प्रमदासु वाग्मी भूयात्ततो विपदि तद्यमहो अमुताम् ५५
पुः साधकस्तयोरुभयोरुक्तयोर्मंत्रयोर्मध्ये अन्यतरं मंत्रमात्मभक्तिः सन् जपादिभिर्भजेत स
श्रीमान् प्रमदासु मन्मथः प्रमदानां क्षोभकः वाग्मी च भूयात् ततो विपदि मरणे च ततः प्रसिद्धं वपु
ताद्यमहो अभ्युपात्साधुज्यमुक्तिं प्रयुक्तो भूयादित्यर्थः ५५ ॥ इति श्रीमज्जनार्दनविरचितायां क्रम
दीपिकाव्याख्यायां नानामंत्रविधानकथनं नाम सप्तमः पटलः समाप्तः ॥ ॐ ॥ संवत्·१९२८
भाद्र प्रविष्टः २ सोमवारेद्वादशे·समाप्तम् ॥

